155

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

तृतीयं

षोडशीतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्षिक २५ तमराङ्क

नियमानुरोधेन प्रकाशकाधीनः अस्ति ।

षोडशीतन्त्रम्

अथ षोडशीध्यानम् ॥

श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

षोडशीतन्त्रम् ॥

अथ षोडशीध्यानम् ॥

बालार्कमण्डलाभासां चतुर्बाहुत्रिलोचनाम् ॥ पाशाङ्कुशशरांश्चापन्धारयन्तींशिवाम्भजे ॥



अथ यन्त्रोद्धारः ॥

विन्दुत्रिकोणवसुकोणदशारयुग्मम्व्यस्वस्वनागदलसङ्गतषोड

शारम् ॥ वृत्तत्रयञ्चधरणीसदनत्रयञ्चश्रीचक्रराजमुदितम्परदेवतायाः ॥



अथमन्त्रोद्धारः ॥

आदौलज्जांसमुच्चार्य्यकएईलततःपरम् ॥ पुनश्चलज्जामुच्चार्य्यहसकहलतुतत्परम् ॥ १ ॥ ततोलज्जाम्पुनःप्रोच्यलज्जान्तं सकलन्ततः ॥ षोडशाक्षरमन्त्रोयंषोडश्यास्समुदाहृतः ॥ २ ॥ इयन्तुसुन्दरीविद्यादेवानामपिदुर्ल्लभा ॥ गोपनीयाप्रयत्नेनसर्व्वसम्पत्करीमता ॥ ३ ॥

अथ मन्त्रः ॥

ह्रींकएईलह्रीं हसकहलह्रीं सकलह्रीं ॥

अथ पूजाविधिः ॥

ब्राह्मेमुहूर्त्ते उत्थायशय्यायामेवस्थित्वा शिरसिमहासहस्रदलकमलेश्रीगुरुन्ध्यायेत् द्विनेत्रन्द्विभुजंशान्तङ्गुरुम्पद्मासनस्थितम् ॥ यथावर्णंसुखासीनम्मुक्तम्भास्वररूपिणम्॥वराभयकरम्ब्रह्मविष्णुशङ्कररूपिणम् ॥ वामेनोत्पलधारिण्याशक्त्यावामाङ्गसंय्युतामितिध्यात्वा । अखण्डमण्डलाकारंव्याप्तंय्येनचराचरम् ॥ तत्पदन्दर्शितंय्येनतस्मैश्रीगुरवेनमः ॥ अज्ञानतिमिरान्धस्यज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितंय्येनतस्मैश्रीगुरवेनमः ॥ नमोस्तुगुरवेतस्मैइष्टदेवस्वरूपिणे ॥ यस्यवागमृतंहन्तिविषसंसार

सङ्कुलम् ॥ अनन्तरात्मागुरुन्नमस्कृत्य अन्तर्भावनाङ्कुर्य्यात् । मूलमष्टोत्तरशतञ्जपेत् ॥ समुद्रमेखलेदेविपर्व्वतस्तनमण्डले ॥ विष्णुपत्निनमस्तुभ्यम्पादस्पर्शङ्क्षमस्वमेइतिपठन् वामपादपुरस्सरम्भूमिंस्पृशेत् । तत्रमन्त्रः । लसहह्रीं ऐंकइङ्कींस इतिस्मृत्वा । तत्रचासनमास्तीर्य्योपविश्यमूलादिब्रह्मरन्ध्रान्तम्मूलविद्याँव्विचिन्तयेत् । उद्यतादित्यसङ्काशान्तडित्कोटिसमप्रभाम् ॥ तत्प्रभापटलव्याप्तन्देहंसुपरिचिन्तयेत् ॥ षट्चक्रभेदनङ्कुर्य्यात् ॥ तद्यथा । गुदलिङ्गान्तरे वंशंषंसं इतिचतुर्दलम्पीतवर्ण्णम्मूलाधारम् अत्रदेवताडाकिनीगणेशश्चतुर्दन्तस्त्रिकोणविद्युद्वर्ण्णन्तन्मध्येबिसतन्तुतनीसीशपाव्वर्त्तनिभां सार्द्धत्रिवलान्विताम्प्रसुप्तभुजगाकारांसोमसूर्य्याग्निरूपिणीङ्कुण्डलिनींशक्तिंहूंकारेणमनोमयदण्डेनाहत्योत्थाप्य हँसइतिजप्त्वा ॥ १ ॥ लिङ्गमूले वंभंमंयंरंलमितिरक्तंस्वाधिष्ठानम् तत्रडाकिनीदेवीब्रह्माच॥२॥नाभौडंढंणंतंथंदंधंनंपंफमितिनीलंमणिपूरम् तत्रलाकिनीदेवीविष्णुश्च ॥ ३॥ हृदये कंखंगंघंङंचंछंजंझंञंटंठमितिद्वादशदलन्धूम्रमनाहतचक्रम् तत्रकाकिनीदेवीरुद्रश्च ॥४॥ कण्ठे अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः इतिषोडशदलंपिङ्गलवर्ण्णंविशुद्धचक्रम् तत्रशाकिनीदेवी शिवात्मा ॥५॥ भ्रूमध्येहंळमितिद्विदलमाज्ञाचक्रम् तत्रहाकिनीदेवीपरात्माच ॥६॥ एवंषट्चक्रम्भित्त्वासहस्रदलकमलकर्ण्णिकान्तर्ग्गतबिन्दुरूपेपरमशिवेसँय्योज्य लक्षाभयरमामृतेनकुण्डलिनींसन्तर्प्यपुनराज्ञाविशुद्धानाहतन्त्रिपुरस्वाधिष्ठानम्मूलाधारन्नयेत् इतिभावनादेवीन्ध्यात्वामानसोपचारैस्सम्पूज्यजप्त्वास्तुत्वानत्वा आवश्यकशौचादिकङ्कृत्वादन्तधावनङ्गृहीत्वाक्लींसर्व्वजनप्रियायैरतिकामस्वरूपायैनम इतिमन्त्रेणदन्तधावनङ्कुर्य्यात् । ततोमूलेनमुखप्रक्षालनङ्कृत्वा यथाकालेजलाशयङ्गत्व

सूर्य्याभिमुखम्मुसलवदेकवारन्निमज्ज्य पुरतश्चतुर्हस्तप्रमाणञ्च तुरस्रम्प्रकल्प्य तन्मध्येत्रिकोणाँव्विलिख्यसूर्य्यमण्डलादङ्कशमुद्रयातीर्थमानयेत्।अँगङ्गेचयमुनेचैवगोदावरिसरस्वति॥नर्म्मदे सिन्धुकावेरिजलेऽस्मिन्सन्निधिङ्कुरु ॥ वामितिधेनुमुद्राम्प्रदर्श्य मूलमष्टधाजापित्वा ॥ कलशमुद्रयामूलेनसप्तधाशिरस्सिञ्चयेत् । सप्तच्छिद्राणिनिरुध्यात्रिधानिमज्जयेत् पापप्रोक्षणङ्कृत्वास न्ध्याङ्कुर्य्यात् ॥ प्राणायामत्रयङ्कृत्वावमितिधेनुमुद्रयाजलममृतीकृत्यात्रिभिः शिरोमूलेनाभ्युक्ष्यनवधाऽचम्यतज्जलन्दक्षिणकरेकृत्वालंवंरंयंहमितिपाञ्चभौतिकमन्त्रमष्टधाजापित्वा मूलन्दशधाजपेत् । वामहस्तानामिकाङ्गुष्टाभ्याञ्छोटिकायोगेनत्रिः शिरोभ्युक्ष्यावशिष्टजलँव्वामहस्ते ईडया अन्तर्गतम्मत्वा तेनैवनिश्शेषकलुषन्दग्धँव्विचिन्त्य पिङ्गलायाम्बहिर्गतँव्विभाव्य तज्जलन्दक्षिणकरेकृत्वातत्रपापपुरुषँव्विचिन्त्यवामभागेभूमौवज्रशिलान्ध्यात्वातत्रनिःक्षिप्यपापपुरुषञ्चूर्णितम्भावयेदित्यघमर्षणम् । ततोदेवादीन्यथाविधिसन्तर्प्य । अँगणेशन्तर्प्पयामिवटुकन्तर्प्पयामि योगिनीन्तर्प्पयामि सर्व्वान्देवगणांस्तर्प्पयामि सर्व्वान्पितृगणांस्तर्प्पयामि सर्व्वान्मातृगणांस्तर्प्पयामि सर्व्वान्मनुष्यगणांस्तर्प्पयामि सर्व्वान्तर्य्यामिमूलमुच्चार्य्य श्रीमहात्रिपुरसुन्दरीन्तर्प्पयामिनम इतित्रिवरान्तर्प्पयित्वा ऐंआत्मतत्त्वंशोधयामि क्लींविद्यातत्त्वंशोधयामि सौंशिवतत्त्वंशोधयामि ऐंक्लींसौं सर्व्वतत्त्वंशोधयामि । ततोजलादुत्थायधौतवाससीपरिधाय मूलेनतिलकङ्कृत्वा गन्धपुष्पाक्षतैरर्घ्यंसम्पाद्यओंऐंह्रींश्रीं कुलमार्तण्डभैरवायतिथिवारनक्षत्रयोगकरणप्रकाशशक्तिसहितायएषोऽर्घ्योनम इतिमन्त्रेणसूर्य्यार्घ्यन्दत्त्वायथाशक्तिदेवतागायत्रीञ्जपेत् । क्लींकामेश्वरींव्विद्महे वागीश्वरीन्धीमहि॥तन्नःक्लि

न्नाप्रचोदयात् रात्रौचन्द्रार्घ्यन्दत्त्वा । क्षीरोदार्ण्णवसम्भूत अत्रिगोत्रसमुद्भव॥ गृहाणार्घ्यमिदन्देवरोहिण्यासहितप्रभो ॥ इति चन्द्रार्घ्यन्दद्यात् । एवंसन्ध्याकालत्रयेपिकुर्य्यात् । ततोदिक्प तीन्नमस्कृत्यपूजागृहद्वारमागत्य हस्तौपादौप्रक्षाल्याचम्य अस्त्रायफट्नम इतिद्वारंसम्प्रोक्ष्यपूजयेत् । वामेशाखायांगंगणेशायनमः दक्षिणेक्षंक्षेत्रपालायनमः ऊर्द्धेद्वांद्वारश्रियैनमः देहलीमध्येदेहल्यैनमः वामपार्श्वेक्लींकामदेवायनमः रंरत्यैनमःवांवसन्तायनमः प्रींप्रीत्यैनमः ॐशङ्खनिधयेनमः दक्षपार्श्वे पद्मनिधयेनमः सरस्वत्यैनमः श्रियैनमः मायायैनमः दुर्ग्गायैनमः भद्रकाल्यैनमः स्वाहायैनमः शुभकर्य्यैनमः गौर्य्यैनमःलोकधात्र्यैनमः वागीश्वर्य्यैनमः दक्षपादपुरस्सरमङ्गानिसङ्कोचयन् गृहान्त ः प्रविशेत् ततोगृहान्तर्प्पयेत् ऐशान्याम्पूजयेत् ॥ ॐवास्तुपुरुषायनमः ॐब्रह्मणेनमः ॥ ततः अपसर्प्पन्तुतेभूतायेभूताभुविसँस्थिताः ॥ येभूताविघ्नकर्त्तारस्तेनश्यन्तुशिवाज्ञया ॥ इतितण्डुलांश्चतुर्द्दिक्षुविकिरेदितिभूतापसारणम् । ऊर्द्धोर्द्धंताल त्रयन्दत्त्वात्रिविघ्नान्वामपादत्रिघातादुत्सारयेत् ॥ ततोव्याघ्राजिनरक्तकम्बलाद्यासनमास्तीर्य्यासनन्धृत्वापठेत् । अस्यासनमन्त्रस्यमेरुपृष्टऋषिः सुतलञ्छन्दः कूर्म्मोदेवताआसनोपवेशने विनियोगः ॥ ॐपृथ्वित्वयाधृतालोकादेवित्वँविष्णुनाधृता ॥ त्वञ्चधारयमान्नित्यम्पवित्रङ्कुरुचासनम् ॥ ततः पूजयेत् । कूंकूर्म्मासनायनमः आधारशक्तिकमलासनायनमः ऐंह्रींश्रीं सर्व्वशक्तिकमलासनायनमः ॐपृथिव्यैनमः ततस्स्वस्तिकाद्यासनेनोपविश्यऐंह्रींश्रींअमृतार्ण्णवात्मकायनम इतिपादयोः ऐंह्रींश्रींश्वेताम्बुजासनायनम इतिजान्वोः ऐंह्रींश्रींदेव्यासनायनमइतिपार्श्वयोः ऐंह्रींश्रींचक्रासनायनम इतिगुह्ये आसनस्यचतुःकोणे

षुपूजयेत् ॐगणपतयेनमः दुर्ग्गायैनमः बटुकभैरवायनमः क्षेत्र पालायनम इतिवायव्यादिनैर्ऋत्यन्तम्।तत ॐह्रींकएईलह्रींहसक हलह्रींसकलह्रीं गंगणपतयेनमःपृष्ठेक्षेत्रपालायनमः सम्मुखेश्रीम हात्रिपुरसुन्दय्यैनमः ॥ अथभूतशुद्धिः ॥ स्वाङ्गेउत्तानौहस्तौकृ त्वासोहमितिमन्त्रेणमूलाधारेयथोक्तरूपाङ्कुण्डलिनीं हूँकारेणम नोमयदण्डेनाहत्योत्थाप्य स्वाधीनमणिपूरानाहतप्रदीपकलिका कारंजीवात्मानन्तयासहविशुद्धाख्यचक्रम्भित्त्वा सहस्रदलकम लान्तर्ग्गतबिन्दुरूपेपरमशिवेसय्यँोज्यशरीरंशून्यँव्विचिन्त्यकु क्षौपापपुरुषन्ध्यायेत्॥वामकुक्षौस्थितम्पापपुरुषङ्कज्जलप्रभम्॥ब्र ह्महत्याशिरस्कञ्चस्वर्ण्णस्तेयभुजद्वयम्॥ सुरापानहृदायुक्तङ्गुरुत ल्पकटिद्वयम्॥तत्सय्यँोगिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्॥ उपपात करोमाणंरक्तश्मश्रुविलोचनम् ॥ अचेतनमधोवक्त्रन्दग्धपादपस न्निभम्॥खड्गचर्म्मधरङ्क्रूरम्पापङ्कुक्षौविचिन्तयेत् ॥इतिध्यात्वा तेनसहशोषणादिकङ्कुर्य्यात् ॥ वामनासापुटेनयमितिवायुबीज न्धूम्रवर्ण्णषोडशवारञ्जपन् वायुमुत्तोल्यनाभौदशदलेनियोज्य समस्तशरीरम्पापपुरुषेणसंशोषयेत्। नासापुटौधृत्वारमितिबीजं रक्तवर्ण्णञ्चतुःषष्टिवारान्जपन् कुम्भकयोगेनशरीरन्तेनसहभ स्मीकुर्य्यात् । वायुमुत्तोल्यहृदिद्वादशदलेनियोज्यवमितिवरुण बीजंशुक्लवर्ण्णन्द्वात्रिंशद्वारञ्जपन् अमृतधाराम्पातयित्वा चमिति चन्द्रबीजञ्चतुःषष्टिवाराञ्जपन्अमृतवृष्ट्याकुम्भकयोगेनाप्लाव्य लमितिभूमिबीजम्पीतवर्ण्णम्मूलाधारस्तम्भमण्डलेनियोज्य सम स्तशरीरम्पुनर्द्देवताराधनयोग्यंशरीरन्दृढीकुर्व्वन् हंस इतिमन्त्रेण जीवात्मानंहृदयचक्रेनयेत्।कुण्डलिनीम्मूलचक्रन्नयेत् ॥ इतिभूत शुद्धिः ॥ ततोहृदिहस्तन्दत्त्वाप्राणप्रतिष्ठाङ्कुर्य्यात् । अस्यप्राणप्र तिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामानिच्छन्दां

सि चैतन्यशक्तिꣳपरमात्मादेवताप्राणप्रतिष्ठायाँव्विनियोगः।आँ ह्रींक्रींयँरँलँवँशँषँसँहँळँक्षँहँसः ममप्राणाइहप्राणाः ममजीवइहस्थितः ॥ १५ ॥ ममेहसर्व्वेन्द्रियाणि ॥ १५ ॥ ममवाङ्मनश्चक्षुः श्रोत्रघ्राणत्वग्रसनाप्राणाइहागत्यसुखञ्चिरन्तिष्ठन्तुस्वाहा ॥ अथप्राणायामः ॥ वामनासापुटन्धृत्वाकएईलह्रीमितिषोडशवारञ्जपन् वायुनाशनैश्शनैꣳपूरयेदितिपूरकः । नासापुटौधृत्वाहसकहलह्रींइतिचतुःष्षष्टिवारञ्जपन्वायुङ्कुम्भयेत् । इतिकुम्भकः। सकलह्रीमितिबीजन्द्वात्रिंशद्वारञ्जपन्वायुन्दक्षनासापुटेनशनैरेचयेत् ॥ इतिरेचकः । एवम्प्राणायामत्रयङ्कुर्य्यात् । अथमातृकान्यासः । अस्यश्रीमातृकान्यासमन्त्रस्यब्रह्मर्षिर्ग्गायत्रीछन्दोवर्ण्णजननीमातृकादेवताहलोबीजानिस्वराःशक्तयꣳकर्म्मसाङ्गुण्येविनियोगः । ब्रह्मर्ष्यायनमः शिरसि गायत्रीछन्दसेनमः मुखे वर्ण्णजननीमातृकादेवतायैनमःहृदि हलबीजेभ्योनमः गुह्ये स्वरेभ्यःशक्तिभ्योनमः गुदे कर्म्मसाङ्गुण्येविनियोगः पादयोः । मातृकान्ध्यायेत्। पञ्चाशल्लिपिभिर्व्विभक्तमुखदोष्काम्मध्यवक्षःस्थलां भासन्मौलिनिबद्धचन्द्रसकलामापीनपिङ्गस्तनीम् ॥ अक्षमालामक्षगुणंसुधाढ्यकलशंविद्यांसुहस्ताम्बुजेबिभ्राणाँव्विशदप्रभान्त्रिनयनाञ्वाग्देवतामाश्रये॥अंनमःललाटे।आंनमःमुखवृत्ते।इंनमः दक्षनेत्रे। ईंनमःवामनेत्रे। उँनमः दक्षकर्ण्णे।ऊँनमःवामकर्ण्णे। ऋंनमः दक्षनासापुटे।ॠंनमः वामनासापुटे। ऌंनमः दक्षगण्डे।ॡंनमः वामगण्डे । एँनमः ओष्ठे। ऐंनमःअधरे ।ओंनमःउर्द्धदन्तपङ्क्तौ । औंनमःअधोदन्तपङ्क्तौ । अँनमः शिरसि।अःनमःमुखे।दक्षबाहुपञ्चसन्ध्यग्रेषु—कँनमः खँनमःगँनमःघँनमः ङँनमः।वामबाहुपञ्चसन्ध्यग्रेषु—चँनमः छँनमः जँनमःझँनमः ञँनमः।दक्षपादपञ्चसन्ध्यग्रेषु—टँनमःठँनमः डँनमः ढँनमःणँनमः।वामपादपञ्चस

न्ध्यग्रेषु-तँनमःथँनमः दँनमःधँनमःनँनमः।दक्षपार्श्वे। पँनमः फँनमः वामपार्श्वे।बँनमः पृष्ठे। भँनमः नाभौ।मँनमःउदरे। यँनमः हृदये। रँनमः दक्षांसे। लँनमः ककुदि।वँनमःवामांसे। शँनमः हृदयादिदक्षहस्ते। षँनमः हृदयादिवामहस्ते। सँनमः हृदयादिदक्षपादे। हँनमःहृदयादिवामपादे। ळँनमः हृदयादि उदरे।क्षँनमः हृदयादिमुखे। इतिमातृकान्यासः॥ अथान्तर्म्मातृकान्यासः। कण्ठेषोडशस्वरान्रक्तवर्णान्। हृदिकादिठान्तान् सिन्दूरवर्णान्।नाभौडादिफान्तान्नीलवर्णान्। लिङ्गेबादिलान्तान्तडिद्वर्णान्। गुदेवादिसान्तान्रक्तवर्णानूर्ध्वमध्येहँक्षँविमलवर्णान् सहस्रारेसहस्रदले अकारादिक्षकारान्तांल्लाक्षारसवर्णान् पञ्चाशद्वर्णान्।एवङ्क्रमेणद्विरावृत्तौतृतीयावृत्तौच विंशत्यावृत्ति पर्य्यन्तंसहस्रधान्यसेत्। मूलाधारमारभ्यसहस्रदलपर्य्यन्तंसर्व्वत्रसर्व्वदलेषुमूलमन्त्रन्न्यसेत्। प्रतिदलम्प्रतिकमलम्प्रतिचक्रङ्कण्डलिन्यागतागतेनएकविंशतिशतंजपम्प्रतिश्वासान्भावयेदित्यजपा॥अन्तर्म्मातृकान्यासश्चसदासावधानेनकर्त्तव्यः॥ इत्यन्तर्म्मातृकान्यासः॥अथकुलुकान्यासः।ऐंक्लींह्रींश्रींभगवतिमहात्रिपुरसुन्दरिस्वाहा इतिकुलुकांशिरसि ओंहृदिसेतुं ह्रींमहासेतुंकण्ठे ह्रींमहासेतुंसहस्रारे ओंश्रींअँएँक्लींसौंऐंअँआँइँईंउँऊँऋँॠँऌँॡँएँऐंओंऔंअँअः कँखँगँघँङँचँछँजँझँञँटँठँडँढँणँतँथँदँधँनँपँफँवँभँमँयँरँलँवँशँषँसँहँळँक्षँइतिनिर्व्वाणनाभौलिङ्गेकामबीजंजिह्वायांमूलविद्याँव्विचिन्त्ययथाशक्तिजपेत्।इतिकुलुकान्यासः॥ अथपीठन्यासः॥ललाटेअँकामरूपपीठाय,नमःसर्व्वत्र। मुखवृत्तेआँवाराणसींपीठाय,दक्षनेत्रेइँनेपालपीठाय, वामनेत्रेईपौण्डवर्द्धनपीठाय दक्षकर्णेउँपुरस्तिरपीठाय,वामकर्णेऊँकालिकुब्जिपीठाय,दक्षिणनासिकायांम् ऋँपूर्णशैलपीठाय,वामनासापुटेॠँअर्ब्बुदपीठा

य,दक्षगण्डेलूँआम्रातकेश्वरपीठाय,वामगण्डेलूंएकाम्रपीठाय,ओ ष्ठे एँत्रिस्रोतपीठाय, अधरे ऐंकामकोटपीठाय, ऊर्द्धदन्तपङ्क्तौ ओंकेदारपीठाय, अधोदन्तपङ्क्तौऔंगुप्तनगरपीठाय, शिरसिअँच न्द्रपुरपीठाय, मुखेअः श्रीपीठाय, दक्षकरपञ्चसन्ध्यग्रेषुकँओंका रपीठाय, खँजालन्धरपीठाय, गँमानपीठाय, घँभद्रकोटपीठाय, ङँदेवीकोटपीठाय, ॥ वामकरपञ्चसन्ध्यग्रेषु चँगोकर्ण्णपीठाय, छँमारुतेश्वरपीठाय जँमङ्गलकोटपीठाय, झँअट्टहासपीठाय, ञँविरजपीठाय, ॥ दक्षपादपञ्चसन्ध्यग्रेषु टंराजगृहपीठाय, ठं महापथपीठाय, डंकोणगिरिपीठाय, ढंऐलापुरपीठाय णंरामे श्वरपीठाय ॥ वामपादपञ्चसन्ध्यग्रेषु तंजपतीपीठाय, थंउज्ज यिनीपीठाय, दंचरित्रीपीठाय, धंक्षीरिकापीठाय, नंहस्तिना पुरपीठाय ॥ दक्षपार्श्वे पंउड्डीशपीठाय,वामपार्श्वेफंप्रयागपी ठाय, पृष्टे बंपष्टीशपीठाय, नाभौ भंमायापुरपीठाय, उदरे मं निर्ज्जनपीठाय,हृदये यंमलयपीठाय,दक्षांसे रं श्रीशैलपीठाय, क कुदि लंमहामेरुपीठाय, वामांसेवंगिरिपीठाय ॥ हृदयादिदक्षह स्तपर्य्यन्तं शंमहेन्द्रपीठाय, हृदयादिवामहस्तपर्य्यन्तं षंरसे नपीठाय। हृदयादिदक्षपादपर्य्यन्तंसंबदरीपीठाय,हृदयादिवाम पादपर्य्यन्तं हंमहालक्ष्मीपुरपीठाय, हृहयादिउदरपर्य्यन्तं ळंउ ड्डीयानपुरपीठाय, हृदयादिमुखपर्य्यन्तं क्षंसौम्यपीठायनमः । ततोमूलाधारेध्यानपीठायनमः स्वाधिष्टानेकामपीठायनमः म णिपूरेज्ञानपीठायनमः अनाहतेविदेहपीठायनमः विशुद्धौन न्दिनीपीठाय० आज्ञायांनन्दापीठाय० ततः सहस्रदलेषुक्षीरनि धिपीठाय० कल्पवनपीठाय० चिन्तामणिपीठाय० पर्य्यङ्कपी ठाय० शिवासनपीठाय० मूर्त्तिमयपीठाय० सर्व्वव्यापकपीठा य० इतिपीठन्यासः ॥ अथरहस्यन्यासः ॥ अस्यश्रीरहस्यन्या

समन्त्रस्यब्रह्माविष्णुमहेश्वराऋषयःऋग्यजुस्सामानिच्छन्दांसिचै तन्यशक्तिमहात्रिपुरसुन्दरीदेवताकृताकृतन्यासपूर्णतासिद्धये विनियोगः। ब्रह्माविष्णुमहेश्वरऋषिभ्योनमः शिरसि, ऋग्यजुस्सा मभ्यश्छन्दोभ्योनमःमुखे, चैतन्यशक्तिमहात्रिपुरसुन्दर्य्यैदेवता यैनमःहृदये,कृताकृतन्यासपूर्णतासिद्धयेविनियोगःपादयोः। ऐं क्लींसौंसौंक्लींऐंश्रींह्रींहंसः सोहं सदाशिवासनायैमहात्रिपुरसुन्दर्य्यै नमःइतिमूलाधारे॥१॥ ऐंक्लींसौंसौंक्लींऐंश्रींह्रींहंसः सोहंरतिप्रिया यैमहात्रिपुरसुन्दर्य्यैनमइतिस्वाधिष्टाने ॥ २ ॥ ऐंक्लींसौंसौं क्लींऐं श्रींह्रींहंसःसोहं ज्ञानस्वरूपायैमहात्रिपुरसुन्दर्य्यैनम इतिमणि पूरे ॥ ३॥ ऐंक्लींसौंसौंक्लींऐंश्रींह्रींहंसःसोहंध्यानस्वरूपायैमहात्रि पुरसुन्दर्य्यैनम इतिअनाहते ॥ ४ ॥ ऐंक्लींसौंसौंक्लींऐंश्रींह्रींहंसः सोहं विशुद्धस्वरूपायैमहात्रिपुरसुन्दर्य्यैनम इतिविशुद्धौ ॥ ५ ॥ ऐंक्लींसौंसौंक्लींऐंश्रींह्रींहंसः सोहं स्वतन्त्रस्वरूपायैमहात्रिपुरसु न्दर्य्यैनम इत्याज्ञायाम् ॥ ६ ॥ ऐंक्लींसौंसौं क्लींऐंश्रींह्रींहंसःसोहं आनन्दस्वरूपायै महासुन्दर्य्यैनम इतिसहस्रारेन्यसेत् ॥ इ तिरहस्यन्यासः ॥ अथकामन्यासः ॥ ह्रींकामायनमः क्लींमन्म थाय० ऐंकन्दर्प्पाय० क्लूंमकरध्वजायनमः स्त्रींमीनकेतवेनमः ॥ तत ऐंहृदयायनमः क्लींशिरसेस्वाहा सौं शिखायैवषट् ऐंकव चायहूम् क्लींनेत्रत्रयायवौषट् सौं अस्त्रायफट्इतिद्विरावृत्यमन्त्रेण करयोर्व्विन्यसेत् ॥ इतिकामन्यासः ॥ अथरत्यादिन्यासः ॥ लि ङ्गेऐंरत्यैनमः हृदिक्लींप्रीत्यैनमःभ्रूमध्येसौंमनोभवायै० भ्रूमध्ये सौं अमृताश्यै० हृदिक्लींयोगिन्यै० लिङ्गेऐंविश्वयोन्यैनमइ तिरतिन्यासः ॥ अथमनोभवन्यासः ॥ शिरासि ह्लौंईशानायम नोभवायनमः, मुखेह्लौंतत्पुरुषायमकरध्वजायनमः, हृदिस्हुंअ घोरकुमारायकन्दर्प्पाय०, गुह्येहस्त्रींवामदेवायमन्मथाय०, पाद

योःह्स्त्रूंसद्योजातायकामदेवायनमः ऊर्द्धवक्त्रेमस्तके ह्स्त्रौंईशा नायमनोभवाय०, पूर्व्ववक्त्रेभाले ह्स्त्रौंतत्पुरुषायमकरध्वजाय०, दक्षिणवक्त्रेदक्षकर्ण्णे ह्स्त्रुंअघोरकुमारायकन्दर्प्पाय०, उत्तरवक्त्रे वामकर्ण्णेह्स्त्रींवामदेवायमन्मथाय०, पश्चिमवक्त्रेचूडाधः ह्स्त्रूंस द्योजातायकामदेवायनमः॥ इतिमनोभवन्यासः॥ अथबाणन्या सः॥ ह्स्त्राँक्षोभणबाणायनमः ह्स्त्रींद्रावणबाणाय० क्लींआकर्ष्षण बाणाय० क्लूंमोहनबाणाय० सःउन्मादनबाणायनमः॥ इति अङ्गुष्टादिकनिष्टान्तङ्करयोर्न्यसेत्॥ इतिबाणन्यासः॥ अथ स्वतन्त्रन्यासः॥ अस्यश्रीमहात्रिपुरसुन्दरीस्वतन्त्रन्यासस्य आनन्दभैरवऋषिर्दैवीगायत्री छन्दः श्रीमहात्रिपुरसुन्दरी दे वता ऐंवीजं सौःशक्तिः क्लींकीलकं धर्म्मार्त्थकाममोक्षार्त्थेविनियो गः॥आनन्दभैरवऋषयेनमःशिरसि, दैवीगायत्रीछन्दसेनमःमुखे श्रीमहात्रिपुरसुन्दरीदेवतायै नमः हृदये, ऐंवीजायनमः नाभौ, सौः शक्तयेनमः स्वाधिष्टाने, क्लींकीलकायनमः मूलाधारे, ध र्म्मार्त्थकाममोक्षार्त्थेविनियोगः पादयोः॥ ऐंह्रींक्लींअङ्गुष्टाभ्यान्न मः क्लींश्रींसौःऐंतर्ज्जनीभ्यांस्वाहा, सौःऔंह्रींश्रींमध्यमाभ्या ब्वँषट्, ऐंकएलह्रींहसकहलह्रीं अनामिकाभ्यांहूम्, क्लींसकलह्रीं कनिष्ठिकाभ्यांवौषट्, सौः सौः ऐंक्लींह्रींश्रीं करतलकरपृष्ठाभ्या म्फट्, ऐंह्रींश्रींऐंकएलह्रींसर्व्वज्ञायैमहात्रिपुरसुन्दर्य्यैहृदयायनमः ऐंह्रींश्रींक्लींसहकहलह्रींनित्यतृप्तायैमहात्रिपुरसुन्दर्य्यै शिरसे स्वाहा ऐंह्रींश्रींसौःसकलह्रींअनादिबोधायैमहात्रिपुरसुन्दर्य्यैशि खायैवषट् ऐंह्रींश्रींऐंकएलह्रींस्वतन्त्रायैमहात्रिपुरसुन्दर्य्यैकव चायहूम् ऐंह्रींश्रींक्लींहसकहलह्रींनित्यमलुप्तशक्तयेमहात्रिपुरसुन्द र्य्यैनेत्रत्रयायवौषट् ऐंह्रींश्रींसौः सकलह्रीं अनन्तायै महात्रिपुरसु न्दर्य्यैअस्त्रायफट् हः अस्त्रायफट् इतिदिग्बन्धः॥ इतिस्वतन्त्र

न्यासः ॥ अथचतुर्दशारचक्रन्यासः ॥ ऐंशिरसि क्लींसौः भ्रुवोः,ऐंललाटे, क्लींसौःश्रोत्रयोः,ऐंभ्रूमध्ये, क्लींसौः नेत्रयोः,ऐंशिरसि,क्लींसौःनासिकयोः,ऐंचिबुके,क्लींसौःओष्ठयोः,ऐंनासिकायाम् क्लींसौः गण्डयोः, ऐंगले, क्लींसौः बाहुमूलयोः, ऐंकण्ठे, क्लींसौः बाह्वोः, ऐंचिबुके, क्लींसौः स्तनयोः, ऐंहृदये, क्लींसौः पार्श्वयोः, ऐंनाभौ, क्लींसौः स्तनयोः, ऐंहृदये, क्लींसौः करयोः, ऐंलिङ्गे, क्लींसौःत्रिकयोः, ऐंपृष्ठे, क्लींसौःनितम्बयोः, ऐंक्लींसौः मूलश्चसर्व्वाधारायनम इतिमूलाधारे ॥ इतिचतुर्दशारन्यासः ॥ ततोऽङ्गदेवतान्यासः ॥ अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः क्लींरसिनीवाग्देवतायैनमश्शिरसि, कंखंगंघंङं क्लींकामेश्वरीवाग्देवतायैनमः ललाटे, चंछंजंझंञं श्रींमोदनीवाग्देवतायैनमः मुखे, टंठंडंढंणंकुविमलाननावाग्देवतायैनमः कण्ठे, तंथंदंधंनं श्रींअव्ययावाग्देवतायैनमः हृदये, पंफंबंभंमं श्रींजयिनीवाग्देवतायैनमः नाभौ, यंरंलंवं क्ष्मींवाग्देवतायैनमः मूलाधारे, शं षंसंहंळंसंक्षंहं क्ष्मींकौलिनीवाग्देवतायैनमइतिपादयोः ॥ इत्यङ्गदेवतान्यासः ॥ अथमन्त्रन्यासः ॥ प्रथमवीजंशिरसि । द्वितीयबीजंमुखे।तृतीयवीजंहृदये॥ ततःसमस्तमूलमन्त्रंशिरस्तःपादपर्य्यन्तन्यसेत् ॥ इतिमन्त्रन्यासङ्कृत्वा पीठन्यासङ्कुर्य्यात् प्रथमंहृदये ऐं आधारशक्तिकमलासनायनमः ऐंअनन्तायनमः ऐंपृथिव्यैनमः ऐंरससमुद्रायनमः ऐंरत्नद्वीपायनमः ऐंकल्पवृक्षायनमः ऐंरत्नमण्डपायनमः दक्षस्कन्धेधर्म्मायनमः वामस्कन्धे ज्ञानायनमः दक्षोरौ वैरासनायनमः वामोरौ ऐश्वर्य्यायनमः मुखे अधर्म्मायनमः दक्षपार्श्वे ज्ञानायनमः वामपार्श्वे अनैश्वर्य्यायनमः नाभौ अवैराग्यायनमः हृदयेअनन्तायनमः पद्मायनमः ॐअर्कमण्डलायनमः ॐसोममण्डलायनमः मँवह्निमण्डलाय

नमः सँसत्त्वायनमः रंरजसेनमः तँतमसेनमः हैंहेंछींहसौः चक्रा सनायनमः सत्त्वमन्त्रासनायनमः साध्यसिद्धासनायनमः ॥ त तोऽत्पद्मचक्रन्ध्यात्वातदुपरिदेवीङ्कन्धपुष्पाक्षतै×करकच्छपमु द्राम्बद्धाध्यायेत् ॥ सकुङ्कुममित्यादि। बालार्कमण्डलाभासाञ्च तुर्ब्बाहुन्त्रिलोचनाम् ॥ पाशाङ्कुशौशरांश्चापन्धारयन्तीं शिवां श्रये ॥ शिरसिपुष्पन्दत्त्वा० गुरुभ्योनमः परमगुरुभ्योनमः परात्परगुरुभ्योनमः परमेष्टिगुरुभ्योनमः। मनसादेवींसम्पूज्यआ वाहनमुद्रयाँय्योनिमुद्राम्प्रदश्र्श्य ततोग्र्घ्यस्थापनङ्कुर्य्यात्। सौः अस्त्रायफट्इतिशङ्खम्प्रक्षाल्यभूमौत्रिकोणमण्डलङ्कृत्वाॐआधा रशक्त्यैनमः कूर्म्मायनमः अनन्तायनम ×पूजयेत्। तदुपरि नमइतिप्रक्षालितान्त्रिपदीन्निधायतदुपरिशङ्खन्निधायत्रिधामूलेना पूर्य्यदूर्व्वाक्षतादिनि×क्षिप्यमंदशकलात्मनेसूर्य्यमण्डलायनमइ तित्रिपदींसम्पूज्यॐद्वादशकलात्मनेवह्निमण्डलायनमइतिजलेपू जयेत्। ॐसोममण्डलायषोडशकलात्मनेनमः। ॐगङ्गे चयमुनेचैवगोदावरिसरस्वति ॥ नर्म्मदेसिन्धुकावेरि जलेस्मि न्सन्निधिङ्कुरु ॥ इतिसूर्य्यमण्डलात्तीर्थमङ्कुशमुद्रयानीयअव गुण्ठनमुद्रयावगुण्ठ्यमूलमष्टधाजप्त्वायोनिमुद्राम्प्रदश्र्श्यअमृती कृत्यधेनुमुद्रयापुनर्म्मूलमष्टधाजपित्वातेनोदकेनाभ्युक्ष्यस्थाप येदिति। ततोविशेषाग्र्घ्यस्थापनम्। स्वपुरत ×किञ्चिद्वामभागे सामान्याग्र्घ्यस्यतोयेनाभ्युक्ष्यत्रिकोणवृत्तगर्ब्भितवृत्तात्मकंपद्म कोणवृत्तचतुरस्रमण्डलङ्कृत्वाअभ्यादिकोणचतुष्टयेपूजयेत्। ॐ उड्डीयानश्रीपादुकाम्पूजयामिनमः जांजालन्धरश्रीपादुकाम्पूज यामिनमः। पूंपूर्णशैलश्रीपादुकाम्पूजयामिनमः कांकामरूप श्रीपादुकांपूजयामिनमः। मूलेननामोच्चार्य्य आधारमण्डला यनम इत्याधारंसम्पूज्य सौःअस्त्रायफट्नम इतित्रिपदींसम्पू

ज्यमण्डलेस्थापयित्वापूजयेत् । मँवह्निमण्डलायदशकलात्मने नमः । ततःसौःअस्त्रायफट्नम इतिशङ्खम्प्रक्षाल्यस्थापयित्वा असूर्य्यमण्डलायद्वादशकलात्मनेनमः श्रीमहात्रिपुरसुन्दर्य्यर्घ्य पात्रायनम इतिशङ्खेसम्पूज्ज उंसोममण्डलायषोडशकलात्म नेश्रीमहात्रिपुरसुन्दर्य्यऽर्घ्यामृतायनम इतिजलेनापूर्य्य तत्रज लेदूर्व्वाक्षतादिदत्त्वा अँगङ्गेचयमुनेचैवेत्यादिनासूर्य्यमण्डलाद ङ्कुशमुद्रयातीर्त्थमावाह्यधेनुमुद्रयामृतीकृत्ययोनिमुद्राम्प्रदर्श्य तदुपरिमूलमष्टधाजपित्वादक्षाङ्गुष्टेनजलंस्पृङ्खामूलंस्मृत्वा अर्घ्य जलस्यआग्नेयकोणमारभ्यविन्यसेत्।हृदयायनमः शिरसेस्वाहा शिखायैवौषट्अस्त्रायफट् ॥ इतिचतुर्दिक्षुविन्यस्य 'ह्रीं'इतिमन्त्रे णसम्पूज्यपञ्चरत्नानिविन्यसेत् । ग्लूं श्लूं प्लूं म्लूं ज्लूमितिपञ्च रत्नानिस्वर्ग्गमर्त्त्यपातालगमनरत्नानिविन्यसेत् । मत्स्यमुद्रया च्छाद्यसंरक्षणमुद्रया संरक्ष्य अवगुण्ठनमुद्रया अवगुण्ठ्य अमृती करणमुद्रया अमृतीकृत्य प्रबोधनमुद्रया प्रबोध्य मूलंस्मृत्वा।अकु लस्थामृताकारेसिद्धिज्ञानकरेपरे ॥ अमृतत्वनिधे त्वस्मिन्वस्तु निक्किन्नरूपिणि ॥ इतिजलमभिमन्त्र्य तज्जलेसात्मानम्पूजोपकर णञ्चाभ्युक्ष्य पीठपूजामारभेत् । ऐंह्रींनम इतिकुशजलेनभूमिं शोधयित्वा त्रिपदीमारोप्यपूजयेत् ॥ ऐंआधारशक्तिकमलास नायनमः कूर्म्मायनमः अनन्तायनमः पृथिव्यैरसाम्बुधयेनमः रत्नद्वीपायनमः नन्दनोद्यानायनमः रत्नमण्डपायनमः रत्नवे दिकायैनमः रत्नसिंहासनायनमः श्रीचक्रायननः ततोह्रमिति मन्त्रेणताम्रपीठँविशोध्यश्रीयन्त्रंस्थापयित्वापीठस्यआग्नेयादि कोणचतुष्टयम्पूजयेत् । धर्मायनमः ज्ञानायनमः वैराग्यायन मः ऐश्वर्य्यायनमः । ततःपूर्व्वादिचतुर्दिक्षु । अधर्म्मायनमः अज्ञानायनमः अवैराग्यायनमः । अनैश्वर्य्यायनमः । पीठस्यो

पारि । आनन्दकन्दायनमः सँव्विन्नालायनमः सर्व्वतत्त्वानुक म्पायनमः पञ्चाशद्वर्ण्णकर्ण्णिकायैनमः विकारमयकेसरेभ्योन मः प्रकृतिमयपत्रेभ्योनमः । मंवह्निमण्डलायनमः अँसूर्य्यमण्ड लायनमः अँसोममण्डलायनमः संसत्त्वायनमः रंरजसेनमः तँ तमसेनमः आंआत्मनेमः अंअन्तरात्मनेमः पंपरमात्मनेन मः ह्रींज्ञानात्मनेनमः ऐंकामरूपपीठायनमः ॥ ऐंपूर्णगिरिपीठा यनमः ऐंजालन्धरपीठायनमःऐंउड्डीयानपीठायनमः॥ इतिसम्पू ज्य ॥ ऐंत्रिपुरेश्वरीमध्यमाभ्यान्नमः क्लींत्रिपुरेश्वरीअनामिका भ्यान्नमः । सौं त्रिपुरेश्वरीकनिष्ठाभ्यान्नमः । ऐंत्रिपुरेश्वरीअङ्गु ष्ठाभ्यान्नमः । क्लींत्रिपुरेश्वरीतर्ज्जनीभ्यान्नमः । सौः त्रिपुरे श्वरीकरतलकरपृष्ठाभ्यान्नमः । ह्रींक्लींसौः देव्यासनायनमः । च क्रासनायनमः सर्व्वमन्त्रासनायनमः साध्यसिद्धासनायनमः । ऐंत्रिपुरेश्वरीहृदयायनमः । क्लींत्रिपुरेश्वरीशिरसेस्वाहा । सौः त्रि पुरेश्वरी शिखायैवषट् । ऐंत्रिपुरेश्वरीकवचायहूम् । क्लींत्रिपुरे श्वरी नेत्रत्रयायवौषट् सौःत्रिपुरेश्वरी अस्त्रायफट् । ततोध्या त्वापुष्पाञ्जलिनादेवितेजः समानीय यन्त्रेकल्पितमूर्त्तौआवाह नमुद्रयाआवाह्य स्थापनमुद्रयासँस्थाप्य त्रिखण्डमुद्राम्बद्धा । महापद्मवनान्तस्थेकरुणामध्यविग्रहे ॥ सर्व्वभूताहितेमातरेह्ये हिपरमेश्वरि ॥ अमृतीकरणपरमीकरणमुद्राम्प्रदर्श्यमूलमुच्चा र्य्यश्रीमहात्रिपुरसुन्दरीप्राणाइहसुप्रतिष्ठिताभवन्तु । मूलमुच्चा र्य्यपाद्यन्नमः मूलमर्घ्योनमः मूलङ्गन्धोनमः मूलम्पुष्पन्नमःमूल न्धूपोनमःमूलन्दीपोनमःमूलन्नैवेद्यन्नमः । लम्पृथिव्यात्मकङ्गन्धं समर्प्पयामिनमःहंआकाशात्मकम्पुष्पंसमर्प्पयामिनमःयव्वाय्वा त्मकन्धूपंसमर्प्पयामिनमः रंवह्न्यात्मकन्दीपंसमर्प्पयामिनमःवं अंबात्मकममृतंसमर्प्पयामिनमः । इतिपञ्चोपचारान्निवेद्य ।

श्रीमहात्रिपुरसुन्दरि तवाज्ञाम्प्राप्यपरिवारानर्च्चयामि । आज्ञा म्प्राप्यपूजयेत् । मध्येह्रींश्रींकामेश्वर्य्यैनमः भगमालिन्यैनमः क्लिन्नायै० भेरुण्डायै० विन्ध्यवासिन्यै० महाविद्येश्वर्य्यै० शि वदूत्यै० त्वरितायै० नित्यायै० नीलपताकायै० विजयायै० श्रियै० सर्व्वमङ्गलायै० ज्वालांशुमालिन्यै० ह्रींश्रींविचित्रायैन म इतिसम्पूज्य । पूर्व्वद्वारे गङ्गणपतयेनमः । पश्चिमद्वारे वम्ब टुकायनमः । उत्तरद्वारे ह्रींदुर्ग्गायैनमः । दक्षिणद्वारेक्षेत्रपा लायनमः । वाह्यचतुरस्रस्यबाह्यरेखायांपश्चिमादिद्वारचतुष्टये ह्रींश्रींअणिमादिसिद्धिश्रीपादुकाम्पूजयामिनमः । लघिमासि द्धिम्पूजयामिनमः । महिमासिद्धिम्पूजयामिनमः।ईशासिद्धिम्पूज यामिनमः।बाह्यादिकोणचतुष्टयेवशित्वसिद्धिश्रीम्पूजयामिनमः। प्राकाश्यसिद्धिश्रीम्पूजयामिनमः।भक्तिसिद्धिश्रीम्पूजयामिनमः। इच्छासिद्धिश्रीम्पूजयामिनमः । अधस्थात्प्राप्तिसिद्धिश्रीम्पूज यामिनमः । ऊर्द्धसर्व्वकामसिद्धिम्पूजयामिनमः । मध्यचतुरस्र स्यपश्चिमादिद्वारचतुष्टये । ह्रींश्रींआंब्राह्मैनमः । ईमाहेश्व र्य्यैनमः । ऊँकौमारीश्रीपादुकाम्पूजयामिनमः । ऋंवैष्णवीश्री० मध्यचतुरस्रस्यवाह्यादिकोणे ह्रींश्रींलृंवाराहीश्री ० ऐंइन्द्रा णीश्री० औंचामुण्डाश्री० अःमहालक्ष्मीश्री० । अभ्यन्तरच तुरस्रस्यपश्चिमादिद्वारचतुष्टये । त्रिखण्डाक्षमुद्राश्री० ह्रींसर्व्व सङ्क्षोभिणीमुद्राश्री० ह्रींसर्व्वविद्राविणीमुद्राश्री० क्लींसर्व्वाक र्षिणीमुद्राश्री० । अभ्यन्तरचतुरस्रस्य बाह्यादिकोणचतुष्टयेक्लूं सर्व्वावेशकरीमुद्राश्री० सर्व्वोन्मादरकरीमुद्राश्री० क्रौंमहाङ्कुश मुद्राश्रीपादु० क्लूंखेचरीमुद्राश्री० ततस्त्रिवलये वीजमुद्रा श्री० योनिमुद्राश्रीं० चार्व्वाकदर्शनायनमः।ततोहस्तेनाग्घ्यंज लङ्गृहीत्वा। अत्रत्रैलोक्यमोहनचतुरस्रचक्रे श्रीमहात्रिपुरसुन्दरी

समधिष्ठिते एताईशित्वाद्याः प्रकट्योगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्व्वोपचारैस्सम्पूजितास्सन्तु इतिमूलेनार्प्पयेत्। ततःषोडशदलेषुपश्चिमदलादारभ्य देव्याः प्रदक्षिणाक्रमेणपूजयेत्।ह्रींश्रींअंकामाकर्ष्षिणीनित्याकलाश्री० आंबुद्ध्याकर्ष्षिणीनित्याकलाश्री०इंअहङ्काराकर्ष्षिणीनित्याकलाश्री० ईंशब्दाकर्ष्षिणीनित्याकलाश्री० उंरूपाकर्ष्षिणीनित्याकलाश्री०ऊंस्पर्शाकर्ष्षिणीनित्याकलाश्री० ऋंरसाकर्ष्षिणीनित्याकलाश्री० ॠंगन्धाकर्ष्षिणीनित्याकलाश्री० ऌंचिन्ताकर्ष्षिणीनित्याकलाश्री० ॡंधैर्य्याकर्ष्षिणीनित्याकलाश्री०एंस्मृत्याकर्ष्षिणीनित्याकलाश्री० ऐंनासाकर्ष्षिणीनित्याकलाश्री० ओंबीजाकर्ष्षिणीनित्याकलाश्री०? अंअमृताकर्ष्षिणीनित्याकलाश्री०अःशरीराकर्ष्षिणीनित्याकलाश्री० रेखायाम्बौद्धदश्शे नायनमः। ततोहस्तेनाग्र्घ्यजलङ्गृहीत्वा। अत्रसर्व्वाशापरिपूरके षोडशदलचक्रेश्रीमहात्रिपुरसुन्दरीसमधिष्ठितेएताःकामाकर्ष्षण्याद्यागुप्तयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्व्वोपचारैः पूजितास्सन्तु। इतिमूलमन्त्रेणदेव्यैनिवेदयेत्। ततोष्टदलचक्रे पूर्व्वदलेषु ह्रींश्रींकँखँगँघँङँअनङ्गकुसुमादेवीश्री० चँछँजँझँञँअनङ्गमेखलादेवीश्री० टँठँडँढँणँअनङ्गमदनादेवीश्री० तँथँदँधँनँअनङ्गमदनातुरादेवीश्री० पँफँबँभँमँअनङ्गरेखादेवीश्री० यँरँलँवँअनङ्गवेगिनीदेवीश्री० शँषँसँहँअनङ्गकुशादेवीश्री० ळँक्षँअनङ्गमालिनीदेवीश्रीपादुकाम्पूजयामिनमः अत्रसङ्क्षोभकरेऽष्टदलचक्रश्रीमहात्रिपुरसुन्दरीसमधिष्ठितेएताअनङ्गकुसुमाद्याः गुप्ततरायोगिन्यः समुद्रास्ससिद्धयः सायुधास्सवाहनास्सपरिवारास्सर्व्वोपचारैःपूजितास्सन्तु इत्यग्र्घ्यजलेनदेव्यै समर्प्पयेत्। ह्रींश्रींसर्व्वसङ्क्षोभिणीशक्तिश्री० सर्व्वद्रा

विणिशक्तिश्रीपादुकाम्पूजयामिनमः सर्व्वाकर्षिणीशक्तिश्रीपादुकाम्पूजयामिनमः सर्व्वाह्लादिनीशक्तिश्री० सर्व्वमोहिनीशक्तिश्री० सर्व्वस्तम्भिनीशक्तिश्री० सर्व्वजृम्भणीशक्तिश्री० सर्व्ववशङ्करीशक्तिश्री० सर्व्वरञ्जिनीशक्तिश्री० सर्व्वोन्मादिनीशक्तिश्री० सर्व्वार्थसाधनीशक्तिश्री० सर्व्वाशापरिपूरणीशक्तिश्री० सर्व्वमन्त्रमयीशक्तिश्री० सर्व्वद्वन्द्वक्षयङ्करीशक्तिश्री० वहिःसाङ्ख्यनैय्यायिकदर्शनेभ्योनमः । अत्रसौभाग्यदायकेचतुर्दशचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठितेएतास्सङ्क्षोभिन्याद्याश्शक्तयः सम्प्रदाययोगिन्यः समुद्रास्ससिद्धयः सायुधास्सवाहनास्सपरिवारास्सर्व्वोपचारैस्सम्पूजितास्सन्तु ।इत्यर्घ्यजलेनमूलन्देव्यैसमर्प्पयेत् ॥ ततोबहिर्दशारचक्रेपश्चिमादिदशान्तंपूजयेत् । ह्रीं श्रीं सर्व्वसिद्धिप्रदादेवीश्री० सर्व्वसम्पदादेवीश्री० सर्व्वप्रियङ्करीशङ्करीदेवीश्री० सर्व्वमङ्गलकारिणीदेवीश्री० सर्व्वकामप्रदादेवीश्री० सर्व्वदुःखविमोचनीदेवीश्री० सर्व्वाङ्गसुन्दरी देवीश्री० सर्व्वमृत्युविनाशिनीदेवीश्री० सर्व्वदुःखविनाशिनीदेवीश्री० सर्व्वसौभाग्यदायिनी देवीश्री० । अत्रसर्व्वाशापरिपूरकेचक्रेश्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एतास्सर्व्वसिद्धिप्रदाद्यादेव्यःकुलकौलिनीयोगिन्यःसमुद्रास्ससिद्धयस्सायुधास्सवाहनास्सपरिवारास्सर्व्वोपचारैस्सम्पूजितास्सन्तु ।इत्यर्घ्यजलेनमूलेनदेव्यैसमर्प्पयेत् । ततोऽन्तर्दशारचक्राग्रादक्षिणान्तर्य्यावत्पूजयेत् । ह्रींश्रीं सर्व्वज्ञादेवीश्री० सर्व्वशक्तिमयीदेवीश्री० सर्व्वैश्वर्य्यप्रदादेवीश्री० सर्व्वज्ञानमयीदेवीश्री० सर्व्वव्याधिविनाशिनीदेवीश्री० सर्व्वाशापरिपूरणीदेवीश्री० सर्व्वपापहरादेवीश्री० सर्व्वानन्दमयीदेवीश्री० सर्व्वान्तकामरूपिणीदेवीश्री० सर्व्वेप्सितफलप्रदादेवीश्री० । अत्र सर्व्वरक्षाकरे अन्तर्दशारचक्रे त्रिपुरमालि

नीश्रीत्रिपुरसुन्दरीसमधिष्ठिते एतास्सर्व्वज्ञाद्यानिर्भययोगिन्य स्समुद्राःससिद्धयःसायुधाःसवाहनाःसपरिवाराःसर्व्वोपचारैस्स म्पूजिताःसन्तु। इत्यर्घ्यजलेनमूलेनदेव्यै समर्पयेत्। ततोऽष्टा रचक्रेचक्रात्पश्चिमादिदक्षिणान्तंयावत्पूजयेत्। ह्रींश्रींअँआँ इँईँउँऊँऋँॠँऌँॡँएँऐँओँऔँअँअः वशिनीवाग्देवताश्री० कँ खँगँघँङँकामेश्वरीवाग्देवताश्री० चँछँजँझँञँमोदिनीवाग्देवता श्री० टँठँडँढँणँ विमलावाग्देवताश्री० तँथँदँधँनँअव्ययावाग्दे वताश्री० पँफँबँभँमँजयिनीवाग्देवताश्री० यँरँलँवँ सर्व्वेश्वरी वाग्देवताश्री० शँषँसँहँक्षँकौलिनीवाग्देवताश्री० ॥ अत्रसर्व्व रोगहरेअष्टारचक्रेश्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एतावशिन्या द्यारहस्ययोगिन्यःसमुद्राःससिद्धयस्सायुधास्सवाहनाः सपरिवा राः सर्व्वोपचारैःसम्पूजितास्सन्तु।इत्यर्घ्यजलेनमूलेनदेव्यैसम र्पयेत्। अभ्यन्तरकोणत्रये पुष्पाञ्जलित्रिवारत्रयन्दद्यात्। च क्रमध्ये दक्षिणे उत्तमवाणायनमः। वामेमोहधनुषेनमः। तदधः कर्कशायनमः। दक्षिणेस्तम्भाङ्कुशायनमः। अग्रे क्लीं कामेश्व र्य्यैनमः। आंचक्रिण्यैनमः। ऐंभगशालिन्यैनमः। मूलेनश्री महात्रिपुरसुन्दर्य्यैनमः। ततः त्रिकोणमध्ये कामकलामीकार रूपांध्यायेत्। ततोब्रह्मविष्णुरुद्रेशानसदाशिवेभ्यः पञ्चप्रेतेभ्यो नमः नवग्रहेभ्योनमइत्यभ्यर्च्यमालाङ्गृहीत्वा यथाशक्तिजपे त्। ततः। गुह्यातिगुह्यगोप्त्रीत्वङ्गृहाणास्मत्कृतञ्जपम्। सिद्धिर्भ वतुमेदेवित्वत्प्रसादान्महेश्वरि ॥ इतिजलेनदेव्यावामहस्तेसम र्पयेत्। जपन्देव्यागृहीतन्तेजोमयँविभाव्य। विधिहीनङ्क्रिया हीनम्भक्तिहीनञ्चयद्भवेत्॥ पूर्णंभवतुतत्सर्व्वं त्वत्प्रसादात्त्रिलो चने॥इतियथाशक्तिस्तुत्वाप्रदक्षिणन्त्रिःप्रणम्यकृतार्थमात्मान म्भावयेत्। योनिमुद्राम्प्रदर्शयेत्। संहारमुद्रयाविसर्ज्जयेत्। नि

र्म्मांल्यङ्गृहीत्वाऐशान्यान्त्रिकोणमण्डलङ्कृत्वा ऐंचँचण्डेश्वय्यनमः इत्यभ्यर्च्य निर्म्मांल्यंशिरसिधृत्वायथासुखँव्विहरेत् । श्रीविद्याज्ञानमात्रेणसर्व्वसिद्धिःप्रजायते ॥ अतोविद्याप्रदातव्यानाभक्तायकदाचन ॥ इतिपूजापद्धतिः ॥

अथ स्तोत्रम् ॥

कल्याणवृष्टिभिरिवामृतपूरिताभिर्ल्लक्ष्मीस्वयँव्वरणमङ्गलदीपिकाभिः ॥ सेवाभिरम्बतवपादसरोजमूले नाकारिकिम्मनसि भक्तिमताञ्जनानाम् ॥ १ ॥ एतावदेवजननिस्पृहणीयमास्ते त्वद्वन्दनेषुसलिलस्थसरोजनेत्रे ॥ सान्निध्यमुद्यदरुणाम्बुजसोदरस्य त्वद्विग्रहस्यसुधयापरयाप्लुतस्य ॥ २ ॥ ईषत्प्रभावकलुषाऽकतिनामसन्ति ब्रह्मादयऽप्रतिदिनम्प्रलयाभिभूताः ॥ एकस्सएवजननिस्थिरसिद्धिरास्ते यऽपादयोस्तवसकृत्प्रणतिङ्करोति ॥ ३ ॥ लब्ध्वासकृत्त्रिपुरसुन्दरितावकीनङ्कारुण्यकन्दलतिकान्तिभरङ्कटाक्षम् ॥ कन्दर्प्पभावसुभगास्त्वयिभक्तिभाजः सम्मोहयन्तितरुणीम्भुवनत्रयेऽपि ॥ ४ ॥ ह्रीङ्कारमेवतवनामगृणन्तियेवामातस्त्रिकोणनिलयेत्रिपुरेत्रिनेत्रे ॥ त्वत्संस्मृतौयमभटाभिभवँव्विहाय दीव्यन्तिनन्दनवनेसहलोकपालैः ॥५॥हन्तुऽपुरामधिगलत्परिपूर्ण्णमानऽक्रूरऽकथन्नभवितागरलस्यवेगः ॥ नाश्वासनाययदिमातरिदन्तवार्द्धदेहस्यशश्वदमृताप्लुतशीतलस्य ॥ ६ ॥ सर्व्वज्ञतांसदसिवाक्पटुताम्प्रसूते देवित्वदङ्घ्रिसरसीरुहयोऽप्रणामः ॥ किञ्चस्फुरन्मुकुटमुज्ज्वलमातपत्रन्द्वेचामरेचमहतीञ्चँसुधान्दधाति ॥ ७ ॥ कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्बभवत्कटाक्षैः ॥ आलोकयत्रिपुरसुन्दरिमामनाथन्त्वय्येवभक्तिभरितन्त्वयिवद्धदृष्टिम् ॥ ८ ॥ हन्तेतरेष्वपिनिधायमनांसिचान्ये भक्तिंव्वहन्तिकिलसापरदैवते

षु ॥ त्वामेवदेविमनसाहमनुस्मरामित्वामेवनौमिशरणञ्जनानि त्वमेव ॥ ९ ॥ लक्षेषुसत्स्वपितवाक्षिविलोकनानामालोकय त्रिपुरसुन्दरिमाङ्कथञ्चित् ॥ नूनम्मयाचसदृशङ्करुणैकपात्रञ्जा तोजनिष्यतिजनोनचजायतेवा ॥ १० ॥ ह्रींह्रीमितिप्रतिदिन ञ्जपतान्तवाख्याङ्किन्नामदुर्ल्लभमिहत्रिपुराभिधाने ॥ माला किरीटमदवारणमाननीयाँस्तान्सेवतेमधुमतीस्वयमेवलक्ष्मीः ॥ ॥ ११ ॥ सम्पत्कराणिसकलेन्द्रियनन्दनानि साम्राज्यदानकु शलानिसरोरुहाक्षि ॥ त्वद्वन्दनानिदुरितोद्धरणोद्यतानिमामेव मातरनिशङ्कलयन्तुनान्यम् ॥ १२ ॥ कल्पोपसंहरणकल्पित ताण्डवस्यदेवस्यखण्डपरशोरपरभैरवस्य ॥ पाशाङ्कुशैक्षवश रासनपुष्पवाणाः सासाक्षिणी विजयते तवमूर्त्तिरेका ॥१३॥लग्नं सदाभवतुमातरिदन्त्वदीयन्तेजरपरम्बहुलकुङ्कुमपङ्कशोणम् ॥ भास्वत्किरीटममृतांशुकलावतंसं रूपं त्रिकोणमुदितम्परमामृ ताक्तम् ॥ १४ ॥ ह्रीङ्कारत्रयसम्पुटेनमहतामन्त्रेणसन्दीपितं स्तोत्रय्यँरतिवासरन्तवपुरोमातर्ज्जपेन्मन्त्रवित् ॥ तस्यक्षोणि भुजोभजन्तिवशगालक्ष्मीश्चिरंस्थायिनी वाणीनिर्म्मलसूक्तिभा वभरिताजागर्त्तिदीर्घय्यँशः ॥ १५ ॥ इतिब्रह्मविरचितंषोडशीक ल्याणीस्तोत्रंसमाप्तम् ॥

अथ कवचम् ॥

देव्युवाच ॥ देवदेवमहादेवभक्तानाम्प्रीतिदायक ॥ सुचि न्तयन्महादेव्याः कवचङ्कथयस्वमे ॥ १ ॥ श्रीमहादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिकवचन्देवदुर्ल्लभम् ॥ अप्रकाश्यम्परङ्गुह्यं साधकाभीष्टसिद्धिदम् ॥ २ ॥ कवचस्यऋषिर्देविदक्षिणामूर्त्तिर व्ययः ॥ छन्दरपाङ्क्तिःसमुद्दिष्टन्देवीत्रिपुरसुन्दरी ॥ ३ ॥ धर्म्मा र्त्थकाममोक्षाणाँव्विनियोगस्तुसाधने॥ वाग्भवङ्कामबीजञ्चशक्ति

बीजंसुरेश्वरि ॥ ४ ॥ वाग्भवम्पातुशीर्ष्षेमाङ्कामबीजन्तथाहृदि॥ शक्तिबीजंसदापातुनाभौगुह्येचपादयोः ॥ ५ ॥ ऐँक्लीसौंवदनेपा तुबालामांसर्व्वसिद्धये ॥ हसोःसकलह्रींपातुभैरवीकण्ठदेशतः ॥ ६ ॥ सुन्दरीनाभिदेशेचशीर्ष्षेकामकलासदा ॥ भ्रूनासयोरन्त रालेमहात्रिपुरसुन्दरी ॥ ७ ॥ ललाटेसुभगापातु भगामाङ्क ण्ठदेशतः ॥ भगोदयातुहृदयेउदरेभगसर्ष्पिणी ॥ ८ ॥ भग मालानाभिदेशे लिङ्गेपातुमनोभवा ॥ गुह्येपातुमहादेवीराजराजे श्वरीशिवा ॥ ९ ॥ चैतन्यरूपिणीपातु पादयोर्ज्जगदम्बिका ॥ नारायणीसर्व्वगात्रेसर्व्वकायेशुभङ्करी ॥ १० ॥ ब्रह्माणीपातु माम्पूर्व्वेदक्षिणेवैष्णवीतथा ॥ पश्चिमेपातुवाराही उत्तरेचमहे श्वरी ॥ ११ ॥ आग्नेय्याम्पातुकौमारी महालक्ष्मीस्तुनैर्ऋते ॥ वायव्याम्पातुचामुण्डाइन्द्राणीपातुईशके ॥ १२ ॥ जलेपातुम हामायापृथिव्यांसर्व्वमङ्गला ॥ आकाशेपातुवरदा सर्व्वत्रिभुवने श्वरी ॥ १३ ॥ इदन्तुकवचन्देव्यादेवानामपिदुर्ल्लभम् ॥ यःपठे त्प्रातरुत्थाय शुचिःप्रयतमानसः ॥ १४ ॥ नाधयोव्याधयस्त स्य नभयञ्चक्वचिद्भवेत् ॥ नतुम्मारीभयन्तस्यपातकानाम्भय न्तथा ॥ १५ ॥ नदारिद्र्यवशङ्गच्छेत्तिष्ठेन्मृत्युवशेनच ॥ ग च्छेत्स्थिरपुरन्देविसत्यंसत्यंवदाम्यहम् ॥ १६ ॥ इदङ्कवच मज्ञात्वाश्रीविद्यायँयोजपेत्प्रिये ॥ सनाप्नोतिफलन्तस्य प्राप्नुया च्छस्त्रघातनम् ॥ १७ ॥ इतिसिद्धयामलेश्रीषोडशीविद्याकवचं समाप्तम् ॥

अथहृदयम् ॥

कैलासेकरुणाक्रान्ता परोपकृतिमानसा ॥ पप्रच्छकरुणा सिन्धुंसुप्रसन्नम्महेश्वरम् ॥ १ ॥ श्रीपार्व्वत्युवाच ॥ आगामिनिक लौब्रह्मन्धर्म्मकर्म्मविवर्ज्जिताः ॥ भविष्यन्तिजनास्तेषाङ्कथंश्रे

योभविष्यति ॥ २ ॥ श्रीशिवउवाच ॥ शृणुदेविप्रवक्ष्यामितव स्नेहान्महेश्वरि ॥ दुर्ल्लभन्त्रिषुलोकेषुसुन्दरीहृदयस्तवम् ॥ ३ ॥ येनरादुःखसन्तप्तादारिद्र्यहतमानसाः ॥ अस्यैवपाठमात्रेणते पांश्रेयोभविष्यति ॥ ४ ॥ ओमस्यश्रीमहाषोडशीहृदयस्तोत्र मन्त्रस्यआनन्दभैरवऋषिर्दैवीगायत्रीच्छन्दः श्रीमहात्रिपुरसुन्द रीदेवता ऐंवीजं सौः शक्तिः क्लींकीलकं धर्म्मार्त्थकाममोक्षार्त्थंवि नियोगः ॥ आनन्दभैरवऋषयेनमश्शिरसि ॥ दैवीगायत्रीछन्द सेनमःमुखे ॥श्रीमहात्रिपुरसुन्दरीदेवतायैनमःहृदये ॥ ऐंवीजाय नमः नाभौ । सौःशक्तयेनमः स्वाधिष्टाने ॥ क्लींकीलकायनमः मूलाधारे । धर्म्मार्त्थकाममोक्षार्त्थंविनियोगः पादयोः ॥ अथक राङ्गन्यासौ ॥ ऐंह्रींक्लींअङ्गुष्टाभ्यान्नमः । क्लींश्रींसौःऐंतर्ज्जनीभ्यां स्वाहा । सौःॐह्रींश्रींमध्यमाभ्यांव्वषट्।ऐंकएईलह्रींहसकहलह्रीं अनामिकाभ्यांहूम् । क्लींसकलकनिष्ठाभ्यांव्वौषट् । सौःसौःऐंक्लीं ह्रींश्रींकरतलकरपृष्ठाभ्यामफट् ॥ एवमङ्गन्यासः ध्यानम् । बा लव्यक्तविभाकरामितनिभाम्भव्यप्रदाम्भारतीमीषत्फुल्लमुखाम्बु जस्मितकरैराशाभवान्धापहाम् ॥ पाशाँसाभयमङ्कुशञ्चवर दंसम्बिभ्रतीम्भूतिदां भ्राजन्तीञ्चतुरम्बुजाकृतिकरैर्व्भक्त्या भजेषोडशीम् ॥ ५ ॥ सुन्दरीसकलकल्मषापहाकोटिकञ्ज प्रियकाम्यकान्तिका ॥ कोटिकल्पकृतपुण्यकर्म्मणापूजनी यपदपुण्यपुष्करा ॥ ६ ॥ शर्व्वरीशसमसुन्दराननाश्रीशशक्ति सुकृताश्रयश्रिता ॥ सज्जनानुशरणीयसत्पदा सङ्कटेसुरग णैःसुवन्दिता ॥ ७ ॥ यासुरासुररणेजवान्विता आजघानजगद म्बिकाऽजिता ॥ ताम्भजामिजगताञ्चिञ्चयाय्युद्धयुक्तादिति जान्सुदुर्ज्जयान् ॥ ८ ॥ योगिनांहृदयसङ्गतां शिवाय्योगयुक्तमन साय्यतात्मनाम् ॥ जाग्रतीञ्चगतियत्नतोद्विजा याञ्चपन्तिहृदि

ताम्भजाम्यहम् ॥ ९ ॥ कल्पकास्तुकलयन्तिकालिकाय्यँत्क लाकलिजनोपकारिकाम् ॥ कौलिकालिकलिताङ्घ्रिकञ्जका न्ताम्भजामिकलिकल्मषापहाम् ॥ १० ॥ बालार्कानन्तशोचि र्न्निजतनुकिरणैर्दीपयन्तीदिगन्तान् दीप्तैर्दैदीप्यमानान्दनुजद लवनानल्पदावानलाभाम् ॥ दान्तोदन्तोग्रचित्तान्दलितदि तिसुतान्दर्शनीयान्दुरन्तान्देवीन्दीनार्द्रचित्तांल्हदिमुदितमनाः षोडशींसंस्मरामि ॥११॥ धीरान्धन्यान्धरित्रीधवविधृतशिरोधू तधूल्यञ्जपादान्धृष्टान्धाराधराधोविनिधृतचपलाचारुचन्दत्प्र भाभाम् ॥ धम्मर्म्मान्धूतोपहारान्धरणिसुरधवोद्धारिणीध्येयरूपा न्धीमद्धन्यातिधन्यान्धनदधनवृतां सुन्दरीञ्चिन्तयामि ॥ १२॥ जयतुजयतुजल्पायोगिनीयोगयुक्ताजयतुजयतुसौम्यासुन्दरीसु न्दरास्या ॥ जयतुजयतुपद्मापद्मिनीकेशवस्य जयतुजय तुकालीकालिनीकालकान्ता ॥ १३ ॥ जयतुजयतुखर्व्वा षोडशींवेदहस्ता जयतुजयतुधात्रीधर्म्मिणीधातृशान्तिः ॥ जयतुजयतुवाणी ब्राह्मणाब्रह्मवन्द्या जयतुजयतुदुर्ग्गादारि णीदेवशत्रोः ॥ १४ ॥ देवित्वंसृष्टिकालेकमलभवभृता राज सीरक्तरूपा रक्षाकालेत्वमम्बाहरिहृदयधृतासात्त्विकीश्वेतरूपा॥ भूरिक्रोधाभवान्तेभवभवनगतातामसीकृष्णरूपा एताश्चान्या स्त्वमेवक्षितिमनुजमतासुन्दरीकेवलाद्या ॥ १५ ॥ सुमलसुमन मेतद्देविगोप्यङ्गुणज्ञे ग्रहणमननयोग्यं षोडशीयङ्कलग्नम् ॥ सुरतरुसमशीलंसम्प्रदम्पाठकानाम्प्रभवतिहृदयाख्यं स्तोत्रम त्यन्तमान्यम् ॥ १६ ॥ इदन्त्रिपुरसुन्दर्य्याःषोडश्याःपरमाद्भुत म् ॥ यः शृणोतिनरस्तोत्रंससदासुखमश्नुते ॥१७॥ नशूद्रायप्रदा तव्यंशठाय समलात्मने ॥ देयन्दान्तायभक्ताय ब्राह्मणायविशेष तः॥१८॥इति श्रीत्रिपुरसुन्दरीतन्त्रे षोडशीहृदयस्तोत्रंसमाप्तम्॥

॥ अथोपनिषत् ॥

ॐपरमकारणभूताशक्तिः केननवचक्ररूपोदेहः नवचक्रशक्तिमयंश्रीचक्रंव्वाराहीपितृरूपा कुरुकुल्लाचीलदेवता माता पुरुषार्थाः सागराः देहोनवरत्नेद्वीपः आधारनवकमुद्राः शक्तयः त्वगादिसप्तधातुभिरनेकैःसंयुक्ताः सङ्कल्पाः कल्पतरवः तेजः कल्पकोद्यानंरसनयाभासमानामधुराम्लतिक्तकटुकषायलवणरसाःषड्रसाः क्रियाशक्तिपीठङ्कुण्डलिनीज्ञानशक्तिःअहमिच्छाशक्तिर्म्महात्रिपुरसुन्दरीज्ञाताहोता ज्ञानमर्च्चैज्ञेयंहविः ज्ञातृज्ञानज्ञेयानमोभेदभावनं श्रीचक्रपूजनन्नियतिसहितशृङ्गारादयोनवरसा अणिमादयः कामक्रोधलोभमोहमदमात्सर्य्यपुण्यपापमयाब्राह्माद्यष्टशक्तयः आधारनवकमुद्राशक्तयः पृथ्व्यतेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्ज्जिह्वाघ्राणवाक्पाणिपादपायूपस्थविकाराः षोडशशक्तयः वचनादानगमनविसर्ग्गानन्दादानोपादानोपेक्षाबुद्धयोऽनङ्गकुसुमादिशक्तयोष्टौ अलम्बुषाकुहूविश्वोदरीवरुणाहस्तिजिह्वायशास्विनीगान्धारीपूषासरस्वतीइडापिङ्गलासुषुम्नाचेतिचतुर्द्दशनाड्यः सर्व्वसङ्क्षोभिण्यादिचतुर्द्दशारदेवताः प्राणापानव्यानोदानसमाननागकूर्म्मकृकलदेवदत्तधनञ्जयादशवायवः सर्व्वसिद्धिप्रदादिवाहिर्द्दशारदेवताः एतद्वायुदशकसंसग्गोंपाधिभेदेनरेचकपूरकपोषकदाहकाल्पावकामृतमितिप्राणसख्यत्वेनपञ्चविधोस्ति जाठराग्निर्म्मनुष्याणाम्मोहको भक्ष्यभोज्यलेह्यचोष्यात्मकञ्चतुर्व्विधमन्नम्पाचयति तदाकाशवान्सकलाः सर्व्वज्ञत्वाद्यन्तर्द्दशारदेवताः शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणादिवशिन्यादिशक्तयोष्टौशब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्चपुष्पवाणाः मनेक्षुधनुर्व्वल्यो

वाणीरागः पाशोद्वेषोऽङ्कुशोऽव्यक्तमहत्तत्त्वाहङ्कारकामेश्वरीवज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणाग्रदेवताः पञ्चदशतिथिरूपेण कालस्यपरिणामावलोकनपञ्चदशनित्याशुद्धानुरूपाधिदेवतानिरुपाधिसार्व्वदेवकामेश्वरी सदानन्दपूर्णाः स्वात्म्यैक्यरूपलालिताकामेश्वरीसदानन्दघनपूर्णाः स्वात्म्यैक्यरूपादेवतालालितामिति साहित्यकरणंसत्त्वंकर्त्तव्यमकर्त्तव्यमितिभावनामुक्ता उपचाराअहन्त्वमस्तिनास्तिकर्त्तव्याकर्त्तव्यमुपासितव्यानुपासितव्यमितिविकल्पनामनोविलापनंहोमः वाह्याभ्यन्तरकरणानाँ रूपग्रहणयोग्यतास्तीत्यावाहनम् तस्य वाह्याभ्यन्तरकरणानामेकरूपविषयग्रहणमासनम् रक्तशुक्लपदैकीकरणम्पाद्यम् उज्वलदामोदानन्दासानन्दनमर्घ्यम् स्वच्छास्वतः शक्तिरित्याचमनम् चिच्चन्द्रमयीस्मरणंस्नानम् चिदग्निस्वरूपपरमानन्दशक्तिस्मरणंवस्त्रम् प्रत्येकंसप्तविंशतिधा भिन्नत्वेनइच्छाक्रियात्मकब्रह्मग्रन्थिमयीसतन्तुब्रह्मनाडीब्रह्मसूत्रम् सव्यातिरिक्तवस्त्रसङ्गरहितस्मरणंविभूषणम् स्वच्छन्दपरिपूर्णस्मरणङ्गन्धःसमस्तविषयाणाम्मनःस्थैर्य्येणानुसन्धानङ्कुसुमन्तेषामेवसर्व्वदास्वीकरणन्धूपः पवनाच्छिन्नोर्द्ध्वज्वलासच्चिदाह्लादाकाशदेहोदीपःसमस्तयातायातिवर्ज्जनन्नैवेद्यम् अवस्थात्रयैकीकरणन्ताम्बूलम् मूलाधारादाब्रह्मरन्ध्रपर्य्यन्तम्ब्रह्मरन्ध्रादामूलाधारपर्य्यन्तङ्गतागतरूपेणप्रादक्षिण्यन्तुरीयावस्थानंसँस्कारदेहशून्यप्रमादितावतिमज्जनम्वलिहरणंसत्त्वमस्तिकर्त्तव्यमकर्त्तव्यमौदासीन्यमात्मविलापनंहोमःभावनाविषयाणामभेदभावनातर्पणम् स्वयन्तत्पादुकानिमज्जनम्परिपूर्णध्यानम् एवम्मूर्त्तित्रयम्भावनयायुक्तोमुक्तोभवतितस्यदेवतात्मैक्यासिद्धिः चितिकार्य्याण्यप्रयत्नेनासिद्धचन्तिसएवशिवयोगीतिकथ्यते॥इतिषोडश्युपनिषत् समाप्ता॥

अथशतनाम ॥

भृगुरुवाच ॥ चतुर्व्वक्त्रजगन्नाथ स्तोत्रञ्वँदमयिप्रभो ॥ य स्यानुष्ठानमात्रेणनरोभक्तिमवाप्नुयात् ॥ १ ॥ ब्रह्मोवाच ॥ स हस्रनाम्नामाकृष्य नाम्नामष्टोत्तरंशतम् ॥ गुह्याद्गुह्यतरङ्गुह्यंसुन्द र्य्याःपरिकीर्तितम् ॥ २ ॥ ओमस्यश्रीषोडश्यष्टोत्तरशतनाम स्तोत्रस्यशम्भुर्ऋषिरनुष्टुप्छन्दः श्रीषोडशीदेवता धर्म्मार्त्थकाम मोक्षसिद्धयेविनियोगः ॥ ॐत्रिपुराषोडशीमाताऽक्षरात्रितया त्रयी ॥ सुन्दरीसुमुखीसेव्यासामवेदपरायणा ॥ ३ ॥ शारदा शब्दनिलया सागरासरिताम्वरा ॥ शुद्धाशुद्धतनुस्साध्वीशिव ध्यानपरायणा ॥ ४ ॥ स्वामिनीशम्भुवनिताशाम्भवीचसर स्वती ॥ समुद्रमथिनीशीघ्रगामिनी शीघ्रसिद्धिदा ॥ ५ ॥ सा धुसेव्यासाधुगम्या साधुसन्तुष्टमानसा ॥ खट्वाङ्गधारिणीखर्व्वा खड्गखर्प्परधारिणी ॥ ६ ॥ षड्वर्गभावरहितापड्वर्गपरिचारि का ॥ षड्वर्गाचषडङ्गाचषोढापोडशवार्ष्पिकी ॥ ७ ॥ क्रतुरू पाक्रतुमतीऋभुक्षाक्रतुमण्डिता ॥ कवर्गादिपवर्गान्ताअन्त स्थानन्तरूपिणी ॥ ८ ॥ अकाराकाररहिताकालमृत्युजराप हा ॥ तन्वीतत्त्वेश्वरीतारात्रिवर्ष्पाज्ञानरूपिणी ॥ ९ ॥ काली करालीकामेशीच्छायासञ्ज्ञाप्यरुन्धती ॥ निर्व्विकल्पामहावेगा महोत्साहामहोदरी ॥ १० ॥ मेघावलाकाविमलाविमलज्ञान दायिनी ॥ गौरीवसुन्धरागोष्ट्रीगवाम्पतिनिषेविता ॥ ११ ॥ भगाङ्गभगरूपाचभक्तिभावपरायणा ॥ छिन्नमस्तामहाधूमात थाधूम्रविभूषणा ॥ १२ ॥ धर्म्मकर्म्मादिरहिताधर्म्मकर्म्मपरा यणा ॥ सीतामातङ्गिनीमेधामधुदैत्यविनाशिनी ॥ १३ ॥ भै रवीभुवनामाताऽभयदाभवसुन्दरी ॥ भावुकाबगलाकृत्याबाला

त्रिपुरसुन्दरी ॥ १४ ॥ रोहिणीरेवतीरम्यारम्भारावणवन्दिता ॥ शतयज्ञमयीसत्त्वाशतक्रतुवरप्रदा ॥ १५ ॥ शतचन्द्रानना देवीसहस्रादित्यसन्निभा ॥ सोमसूर्य्याग्निनयना व्याघ्रचर्म्माम्ब रावृता ॥ १६ ॥ अर्द्धेन्दुधारिणी मत्तामदिरामदिरेक्षणा ॥ इतितेकथितङ्गोप्यन्नाम्नामष्टोत्तरंशतम् ॥ १७ ॥ सुन्दर्याःसर्व्वदंसेव्यम्महापातकनाशनम् ॥ गोपनीयङ्गोपनीयङ्गोपनीयङ्कलौ युगे ॥ १८ ॥ सहस्रनामपाठस्यफलय्यद्वैप्रकीर्त्तितम् ॥ तस्मात्कोटिगुणम्पुण्यंस्तवस्यास्यप्रकीर्तनात् ॥ १९ ॥ पठेत्सदाभक्तियुतोनरोयो निशीथकालेऽप्यरुणोदयेवा ॥ प्रदोषकालेनवमीदिनेऽथवा लभेतभोगान्परमाद्भुतान्प्रियान् ॥ २० ॥ इति ब्रह्मयामलेपूर्व्वखण्डे षोडश्यष्टोत्तरशतनामस्तोत्रंसमाप्तम् ॥

अथसहस्रनाम ॥

कैलासशिखरेरम्येनानारत्नोपशोभिते ॥ कल्पपादपमध्यस्थेनानापुष्पोपशोभिते ॥ मणिमण्डपमध्यस्थेमुनिगन्धर्व्वसेविते ॥ तङ्कश्चित्सुखमासीनम्भगवन्तञ्जगद्गुरुम् ॥ कपालखट्वाङ्गधरञ्चन्द्रार्द्धकृतशेखरम्॥त्रिशूलडमरूहस्तम्महावृषभवाहनम् ॥ जटाजूटधरन्देवव्वासुकीकण्ठभूषणम् ॥ विभूतिभूषणन्देवन्त्रीलकण्ठन्त्रिलोचनम् ॥ द्वीपिचर्म्मपरीधानंशुद्धस्फटिकसन्निभम् ॥ सहस्रादित्यसङ्काशङ्गिरिजार्द्धाङ्गभूषणम् ॥ प्रणम्यशिरसानाथङ्गरणंव्विश्वरूपिणम् ॥ कृताञ्जलिपुटोभूत्वाप्राहेनंशिखिवाहनः ॥ कार्त्तिकेयउवाच ॥ देवदेवजगन्नाथसृष्टिस्थितिलयात्मक ॥ त्वमेवपरमात्माच त्वङ्गतिस्सर्व्वदेहिनाम् ॥ त्वङ्गतिस्सर्व्वलोकानान्दीनानाञ्चत्वमेवहि ॥ त्वमेवजगदाधारस्त्वमेवविश्वकारणः ॥ त्वमेवपूज्यस्सर्व्वेषान्त्वदन्योनास्तिमेगतिः ॥ किङ्कुह्मम्परमँल्लोकेकिमेकंसर्व्वसिद्धिदम् ॥ किमेकम्परमंश्रेष्ठङ्किंयो

गंस्वर्ग्गमोक्षदम् ॥ विनातीर्त्थेनतपसाविनादानैर्व्विनामखैः ॥ विनालयेनध्यानेननरः सिद्धिमवाप्नुयात् ॥ कस्मादुत्पद्यते सृष्टिःकास्मिंश्चप्रलयोभवेत्॥कस्मादुत्तीर्य्यतेदेवसंसाराण्र्णवसङ्कटात् ॥ तदहंश्रोतुमिच्छामिकथयस्वमहेश्वर ॥ ईश्वरउवाच ॥ साधुसाधुत्वयापृष्टम्पार्व्वतीप्रियनन्दन ॥ अस्तिगुह्यतमम्पुत्रकथयिष्याम्यसंशयम्॥सत्त्वंरजस्तमश्चैवयेचान्येमहदादयः ॥ यचान्येवहवोभूताःसव्वप्रकृतिसम्भवाः ॥ सैवदेवीपराशक्तिर्म्महात्रिपुरसुन्दरी ॥ सैवप्रसूयते विश्वँविश्वंसैवप्रयास्यति ॥ सैवसंहरतेविश्वञ्चगदेतच्चराचरम् ॥ आधारस्सर्व्वभूतानांसैवरोगार्त्तिहारिणी ॥इच्छाज्ञानक्रियाशक्तिर्ब्ब्रह्मविष्णुशिवादयः॥ त्रिधाशक्तिस्वरूपेणसृष्टिस्थितिविनाशिनी ॥ सृज्यतेब्रह्मरूपेणविष्णुरूपेणपाल्यते ॥ संहरेद्रुद्ररूपेणजगदेतच्चराचरम् ॥ यस्यायोनौजगत्सर्व्वमद्यापिपरिवर्त्तते ॥ यस्याम्प्रलीयतेचान्तेयस्याञ्चजायतेपुनः ॥ यांसमाराध्यत्रैलोक्यंसम्प्राप्तम्पदमुत्तमम् ॥ तस्यानामसहस्रन्तु कथयामिशृणुष्वतत् ॥ ॐअस्यश्रीमहात्रिपुरसुन्दरीसहस्रनामस्तोत्रमन्त्रस्यश्रीभगवान्दक्षिणामूर्त्तिर्ऋषिः जगतीच्छन्दः समस्तप्रकटगुप्तसम्प्रदायकुलकौलोत्तीर्णनिर्ग्गर्ब्भरहस्याचिन्त्यप्रभावतीदेवता ॐवीजम्।मायाशक्तिः कामराजवीजकीलकम् जीवोवीजमसुषुम्नानाडीसरस्वतीशक्तिर्द्धर्म्मार्त्थकाममोक्षात्थेंजपेविनियोगः ॥ आधारेतरुणार्कबिम्बरुचिरंहेमप्रभम्वाग्भवम्वीजम्मन्मथमिन्द्रगोपसदृशंहृत्पङ्कजेसंस्थितम्॥ विष्णुब्रह्मपदस्थशक्तिकलितंसोमप्रभाभासुरय्येध्यायन्तिपदत्रयन्तवशिवेतेयान्तिसौख्यम्पदम् ॥ कल्याणीकमलाकालीकरालीकामरूपिणी॥कामाख्याकामदाकाम्या कामना कामचारिणी ॥ कालरात्रिर्म्महारात्रिःकपालीकालरूपिणी ॥ कौमारी करुणामुक्तिः कलिकल्म

षनाशिनी ॥ कात्यायनीकराधाराकौमुदीकमलप्रिया ॥ कीर्त्ति दा बुद्धिदामेधानीतिज्ञानीतिवत्सला ॥ माहेश्वरीमहामायामहा तेजामहेश्वरी ॥ महाजिह्वामहाघोरामहादंष्ट्रामहाभुजा ॥ महामो हान्धकारघ्नीमहामोक्षप्रदायिनी ॥ महादारिद्र्यनाशाचमहाशत्रु विमर्द्दिनी ॥ महामायामहावीर्य्यामहापातकनाशिनी ॥ महाम खामन्त्रमयी मणिपूरकवासिनी ॥ मानसीमानदा मान्यामनश्च क्षूरणेचरा ॥ गणमाताचगायत्रीगणगन्धर्व्वसेविता ॥ गिरिजागि रिशासाध्वीगिरिस्थागिरिवल्लभा ॥ चण्डेश्वरीचण्डरूपाप्रचण्डा चण्डमालिनी ॥ चर्च्चिकाचर्च्चिकाकाराचण्डिकाचारुरूपिणी ॥ यज्ञेश्वरीयज्ञरूपाजपयज्ञपरायणा ॥ यज्ञमातायज्ञभोक्रीयज्ञे शीयज्ञसम्भवा ॥ सिद्धयज्ञक्रियासिद्धिर्य्ययज्ञाङ्गीयज्ञरक्षिका ॥ यज्ञक्रियायज्ञरूपायज्ञाङ्गीयज्ञरक्षिका ॥ यज्ञक्रियाचयज्ञाच यज्ञायज्ञक्रियालया ॥ जालन्धरीजगन्माता जातवेदाजगत्प्रि या ॥ जितेन्द्रियाजितक्रोधाजननीजन्मदायिनी ॥ गङ्गागोदा वरीचैवगोमतीचशतद्रुका ॥ घर्घरावेदगर्भाचेरेचिकासमवासि नी ॥ सिन्धुर्म्मन्दाकिनीक्षिप्रायमुनाचसरस्वती ॥ भद्रारागवि पाशाचगण्डकीविन्ध्यवासिनी ॥नर्म्मदासिन्धुकावेरीवेत्रवत्यासु कौशिकी ॥ ग्रहेन्द्रतनयाचैवअहल्याचर्म्मकावती ॥ अयोध्या मथुरामायाकाशीकाञ्चीअवन्तिका ॥ पुरीद्वारावतीतीर्त्थामहा किल्विषनाशिनी ॥ पद्मिनीपद्ममध्यस्थापद्मकिञ्जल्कवासिनी ॥ पद्मवक्त्राचकोराक्षीपद्मस्थापद्मसम्भवा ॥ ह्रीङ्कारीकुण्डलीधा री हृत्पद्मस्थासुलोचना ॥ श्रीङ्कारीभूषणालक्ष्मीःक्लीङ्कारीक्लेशनाशिनी ॥ हरिवक्रोद्भवाशान्ताहरिवक्रकृतालया ॥ हरिव क्रोद्भवाशान्ताहरिवक्षस्स्थलस्थिता ॥ वैष्णवीविष्णुरूपाच विष्णुमातृस्वरूपिणी ॥ विष्णुमायाविशालाक्षी विशालनयनो

ज्ज्वला ॥ विश्वेश्वरी च विश्वात्मा विश्वेशीविश्वरूपिणी ॥ विश्वेश्वरीशिवाराध्याशिवनाथाशिवप्रिया ॥ शिवमाताशिवा ख्याचशिवदाशिवरूपिणी ॥ भवेश्वरीभवाराध्याभवेशीभवना यिका ॥ भवमाताभवगम्याभवकण्टकनाशिनी ॥ भवप्रियाभ वानन्दाभवानीभवमोहिनी ॥ गायत्रीचैवसावित्रीब्रह्माणीब्रह्मरू पिणी ॥ ब्रह्मेशीब्रह्मदात्रीब्रह्माणीब्रह्मवादिनी ॥ दुर्ग्गस्थादु र्ग्गरूपाचदुर्ग्गादुर्ग्गार्त्तिनाशिनी ॥ सुगमादुर्ग्गमादान्तादयादो ग्ध्रीदुरापहा ॥ दुरितघ्नीदुराध्यक्षादुरादुष्कृतनाशिनी ॥ पञ्चा स्यापञ्चमीपूर्ण्णापूर्ण्णपीठनिवासिनी ॥ सत्त्वस्थासत्त्वरूपाचस त्त्वस्थासत्त्वसम्भवा ॥ रजस्स्थाचरजोरूपारजोगुणसमुद्भवा ॥ तमस्स्थाचतमोरूपा तामसीतामसप्रिया ॥ तमोगुणसमुद्भूता सात्त्विकीराजसीकला ॥ काष्ठामुहूर्त्तानिमिषाअनिमेषाततः प रम् ॥ अर्द्धमासाचमासाचसंवत्सरस्वरूपिणी ॥ योगस्थायो गरूपाचकल्पस्थाकल्परूपिणी ॥ नानारत्नविचित्राङ्गीनानाभ रणमण्डिता ॥ विश्वात्मिकाविश्वमाताविश्वपाशविनाशिनी ॥ विश्वासकारिणीविश्वाविश्वशक्तिविचारणा ॥ यवाकुसुमसङ्का शादाडिमीकुसुमोपमा ॥ चतुरङ्गीचतुर्ब्बाहुश्चतुराचारवासिनी ॥ सर्व्वेशीसर्व्वदासर्व्वासर्व्वदासर्व्वदायिनी ॥ माहेश्वरीचसर्व्वाद्या शर्व्वाणीसर्व्वमङ्गला ॥ नलिनीनन्दिनीनन्दाआनन्दानन्दव र्द्धिनी ॥ व्यापिनीसर्व्वभूतेषुभवभारविनाशिनी ॥ सर्व्वशृङ्गारवे षाढ्यापाशाङ्कुशकरोद्यता ॥ सूर्यकोटिसहस्राभाचन्द्रकोटि निभानना ॥ गणेशकोटिलावण्याविष्णुकोट्यरिमर्द्दिनी ॥ दा वाग्निकोटिनलिनी रुद्रकोट्युग्ररूपिणी ॥ समुद्रकोटिगम्भीरा वायुकोटिमहाबला॥आकाशकोटिविस्तारायमकोटिभयङ्करी ॥ मेरुकोटिसमुच्छ्रायागणकोटिसमृद्धिदा ॥ निष्कस्तोकानिरा

धारानिर्गुणागुणवर्जिता ॥ अशोकाशोकरहितातापत्रयविव र्जिता ॥ वसिष्ठाविश्वजननीविश्वाख्याविश्ववर्द्धिनी ॥ चि त्राविचित्रचित्राङ्गीहेतुगर्भाकुलेश्वरी ॥ इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिःशुचिस्मिता ॥ शुचिःस्मृतिमयीसत्याश्रुतिरूपाश्रु तिप्रिया ॥ महासत्त्वमयीसत्त्वापञ्चतत्त्वोपरिस्थिता ॥ पार्व्व तीहिमवत्पुत्रीपारस्थापाररूपिणी ॥ जयन्तीभद्रकालीचअह ल्याकुलनायिका ॥ भूतधात्रीचभूतेशी भूतस्थाभूतभावना ॥ महाकुण्डलिनीशक्तिर्म्महाविभववर्द्धिनी ॥ हंसाक्षीहंसरूपा चहंसस्थाहंसरूपिणी ॥ सोमसूर्य्याग्निमध्यस्था मणिमण्डल वासिनी ॥ द्वादशारसरोजस्था सूर्य्यमण्डलवासिनी ॥ अकल ङ्काशशाङ्काभाषोडशारनिवासिनी ॥ डाकिनीराकिनीचैवलाकि नीकाकिनीतथा ॥ शाकिनीहाकिनीचैवषट्चक्रेषुनिवासिनी ॥ सृष्टिस्थितिविनाशायसृष्टिस्थित्यन्तकारिणी ॥ श्रीकण्ठप्रिय हृत्कण्ठानन्दाख्याबिन्दुमालिनी ॥ चतुष्षष्टिकलाधारादेहद ण्डसमाश्रिता ॥ मायाकालीधृतिर्म्मेधाक्षुधातुष्टिर्म्महाद्युतिः ॥ हिङ्कुलामङ्गलासीतासुषुम्नामध्यगामिनी ॥ परघोराकराला क्षीविजयाजयदायिनी ॥ हृत्पद्मनिलयाभीममहाभैरवनादि नी ॥ आकाशलिङ्गसम्भूताभुवनोद्यानवासिनी ॥ महत्सूक्ष्मा चकङ्कालीभीमरूपामहाबला ॥ मेनकागर्भसम्भूतातप्तकाञ्चन सन्निभा ॥ अन्तरस्थाकूटबीजात्रिकूटाचलवासिनी ॥ वर्ण्णा ख्यावर्ण्णरहितापञ्चाशद्वर्ण्णभेदिनी ॥ विद्याधरीलोकधात्रीअप्स राअप्सरःप्रिया ॥ दीक्षादाक्षायणीदक्षादक्षयज्ञविनाशिनी ॥ यशःपूर्ण्णायशोदाचयशोदागर्भसम्भवा ॥ देवकीदेवमाताचरा धिकाकृष्णवल्लभा ॥ अरुन्धतीशचीन्द्राणीगान्धारीगन्धमालि नी ॥ ध्यानातीताध्यानगम्याध्यानज्ञाध्यानधारिणी ॥ लम्बो

दरीचलम्बोष्ठीजाम्बवन्तीजलोदरी ॥ महोदरीमुक्तकेशीमुक्त कामार्त्थसिद्धिदा ॥ तपस्विनीतपोनिष्ठासुपर्ण्णीधर्म्मवासिनी ॥ बाणचापधराधीरापाञ्चालीपञ्चमप्रिया ॥ गुह्याङ्गीचसुभीमाच गुह्यतत्त्वानिरञ्जना ॥ अशरीराशरीरस्थासंसाराण्र्णवतारिणी ॥ अमृतानिष्कलाभद्रासकलाकृष्णपिङ्गला ॥ चक्रप्रियाचचक्रा ह्वापञ्चचक्रादिदारिणी ॥ पद्मरागप्रतीकाशानिर्म्मलाकाशस न्निभा ॥ अधःस्थाऊर्द्ध्वरूपाच ऊर्द्ध्वपद्मनिवासिनी ॥ कार्य्य कारणकर्त्तृत्वेशश्वद्रूपेषुसंस्थिता ॥ रसज्ञारसमध्यस्थागन्ध स्थागन्धरूपिणी ॥ परब्रह्मस्वरूपाचपरब्रह्मनिवासिनी॥ श ब्दब्रह्मस्वरूपाचशब्दस्थाशब्दवर्जिता ॥ सिद्धिर्ब्बुद्धिरपराबु द्धिः सन्दीप्तिर्म्मध्यसंस्थिता ॥ स्वगुह्याशाम्भवीशक्तिस्तत्त्व स्थातत्त्वरूपिणी ॥ शाश्वतीभूतमाताचमहाभूताधिपप्रिया ॥ शुचिप्रेताधर्म्मसिद्धिर्द्धर्म्मवृद्धिरपराजिता ॥ कामसन्दीपिनीका मासदाकौतूहलप्रिया ॥ जटाजूटधरामुक्तासूक्ष्माशक्तिविभूष णा ॥ द्वीपिचर्म्मपरीधानाचीरवल्कलधारिणी ॥ त्रिशूलडमरु धरानरमालाविभूषणा ॥ अत्युग्ररूपिणीचोग्राकल्पान्तदहनो पमा ॥ त्रैलोक्यसाधिनीसाध्यासिद्धिसाधकवत्सला ॥ सर्व्व विद्यामयीसाराचासुराणाँव्विनाशिनी ॥ दमनीदामनीदान्ता दयादोग्ध्रीदुरापहा ॥ अग्निजिह्वोपमाघोरघोरघोरतरानना ॥ ना रायणीनारसिंहीनृसिंहहृदयेस्थिता ॥ योगेश्वरीयोगरूपायोगमा ताचयोगिनी ॥ खेचरीखचरीखेलानिर्व्वाणपदसंश्रया ॥ नागि नीनागकन्याचसुवेशानागनायिका ॥ विषज्वालावतीदीप्ता क लाशताविभूषणा ॥ तीव्रवक्त्रामहावक्त्रानागकोटित्वधारिणी ॥ महासत्त्वाचधर्म्मज्ञाधर्म्मातिसुखदायिनी ॥ कृष्णमूर्द्धामहामूर्द्धा घोरमूर्द्धावरानना ॥ सर्व्वेन्द्रियमनोन्मत्तासर्व्वेन्द्रियमनोमयी ॥

सर्व्वसङ्ग्रामजयदासर्व्वप्रहरणोद्यता ॥ सर्व्वपीडोपशमनीसर्व्वा रिष्टनिवारिणी ॥ सर्व्वैश्वर्य्यसमुत्पन्नासर्व्वग्रहविनाशिनी ॥ मात ङ्गीमत्तमातङ्गीमातङ्गीप्रियमण्डला ॥ अमृतोदधिमध्यस्थाकटि सूत्रैरलङ्कृता ॥ अमृतोदधिमध्यस्थाप्रवालवसनाम्बुजा ॥ म णिमण्डलमध्यस्थाईषत्प्रहसिताननना ॥ कुमुदाललितालोलाला क्षालोहितलोचना ॥ दिग्वासादेवदूतीचदेवदेवाधिदेवता ॥ सिं होपरिसमारूढा हिमाचलनिवासिनी ॥ अट्टाट्टहासिनीघोराघो रदैत्यविनाशिनी ॥ अत्युग्ररक्तवस्त्राभानागकेयूरमण्डिता ॥ मुक्ताहारलतोपेतातुङ्गपीनपयोधरा ॥ रक्तोत्पलदलाकारामदा घूर्णितलोचना ॥ समस्तदेवतामूर्तिःसुरारिक्षयकारिणी ॥ ख ड्गिनीशूलहस्ताचचक्रिणीचक्रमालिनी ॥ शङ्खिनीचापिनी वाणीवज्रिणीवज्रदण्डिनी ॥ आनन्दोदधिमध्यस्थाकटिसूत्रैरल ङ्कृता ॥ नानाभरणदीप्ताङ्गानानामणिविभूषिता ॥ जगदानन्द सम्भूताचिन्तामणिगुणान्विता ॥ त्रैलोक्यनमितातुर्य्याचिन्म यानन्दरूपिणी॥ त्रैलोक्यनन्दिनीदेवीदुःखदुस्स्वप्ननाशिनी ॥ घोराग्निदाहशमनीराज्यदेवार्त्थसाधिनी ॥ महापराधराशिघ्नीम हाचौरभयापहा ॥ रागादिदोषरहिताजरामरणवर्जिता ॥ चन्द्रम ण्डलमध्यस्थापीयूषार्ण्णवसम्भवा ॥ सर्व्वदेवैःस्तुतादेवीसर्व्वसि द्धैर्न्नमस्कृता ॥ अचिन्त्यशक्तिरूपाचमणिमन्त्रमहौषधी ॥ अस्तिस्वास्तिमयीबालामलयाचलवासिनी॥ धात्रीविधात्रीसंहा री रतिज्ञारतिदायिनी ॥ रुद्राणीरुद्ररूपाचरुद्ररौद्रार्त्तिनाशि नी ॥ सर्व्वज्ञाचैवधर्म्मज्ञारसज्ञादीनवत्सला ॥ अनाहताग्निय नानिर्भारानिर्व्वृतिः परा ॥ पराघोराकरालाक्षीसुमतीश्रेष्ठदायि नी ॥ मन्त्रालिकामन्त्रगम्यामन्त्रमालासुमन्त्रिणी ॥ श्रद्धान न्दामहाभद्रानिर्द्वन्द्वानिर्गुणात्मिका॥ धरिणीधारिणीपृथ्वीधरा

धात्रीवसुन्धरा॥मेरुमन्दरमध्यस्थास्थितिःशङ्करवल्लभा ॥ श्रीमतीश्रीमयीश्रेष्टाश्रीकरीभावभाविनी ॥ श्रीदाश्रीमाश्रीनिवासाश्रीमतीश्रीमताङ्गतिः॥उमासाराङ्गिणीकृष्णाकुटिलाकुटिलालका ॥ त्रिलोचनात्रिलोकात्मापुण्यपुण्याप्रकीर्त्तिता ॥ अमृतासत्यसङ्कल्पासासत्याग्रन्थिभेदिनी ॥ परेशीपरमासाध्यापराविद्यापरात्परा ॥ सुन्दराङ्गीसुवर्णाभासुरासुरनमस्कृता ॥ प्रजाप्रजावती धन्याधनधान्यसमृद्धिदा ॥ ईशानीभुवनेशानीभवानीभुवनेश्वरी ॥ अनन्तानन्तमहिताजगत्साराजगद्भवा ॥ अचिन्त्यात्माचिन्त्यशक्तिश्चिन्त्याचिन्त्यस्वरूपिणी ॥ ज्ञानगम्याज्ञानमूर्त्तिर्ज्ञानिनीज्ञानशालिनी ॥ असिताघोररूपाचसुधाधारासुधावहा॥भास्करी भास्वतीभीतिर्भास्वदक्षानुशायिनी ॥ अनसूयाक्षमालज्ञादुर्ल्लभाभरणात्मिका ॥ विश्वधीविश्ववीराचविश्वधीविश्वसंस्थिता ॥ शीलस्थाशीलरूपाचशीलाशीलप्रदायिनी ॥ बोधनीबोधकुशलाबोधनीबोधनीतथा ॥ विद्योतिनीविचित्रात्मा विद्युत्पटलसन्निभा ॥ विश्वयोनिर्म्महायोनिः कर्म्मयोनिः प्रियात्मिका ॥ रोहिणीरोगशमनीमहारोगज्वरापहा ॥ रसदापुष्टिदापुष्टिर्म्मानदामानवप्रिया॥ कृष्णाङ्गवाहिनीकृष्णाकृष्णाकृष्णसहोदरी ॥ शाम्भवीशम्भुरूपाचशम्भुस्थाशम्भुसम्भवा॥विश्वोदरीयोगमाता योगमुद्राघ्नयोगिनी ॥ वागीश्वरीयोगनिद्रायोगिनीकोटिसेविता ॥ कौलिकामन्दकन्याचशृङ्गारपीठवासिनी॥ क्षेमङ्करीसर्व्वरूपादिव्यरूपादिगम्बरी ॥ धूम्रवक्राधूम्रनेत्राधूम्रकेशीचधूसरा ॥ पिनाकीरुद्रवेतालीमहावेतालरूपिणी ॥ तापिनीतापिनीदीक्षाविष्णुविद्यात्मनाश्रिता ॥ मन्थराजठरातीव्राअग्निजिह्वाभयापहा ॥ पशुघ्नीपशुरूपाचपशुहापशुवाहिनी ॥ पिताताचधीराचपशुपाशविनाशिनी ॥ चन्द्रप्रभा चन्द्ररेखाचन्द्र

कान्तिविभूषिणी ॥ कुङ्कुमाङ्कितसर्वाङ्गीसुधासङ्घरुलोचना ॥ शुक्लाम्बरधरादेवीवीणापुस्तकधारिणी ॥ ऐरावतपद्मधाराश्वेतप द्मासनस्थिता ॥ रक्ताम्बरधरादेवीरक्तपद्मविलोचना ॥ दुस्त रातारिणीतारातरुणीतारूपिणी ॥ सुधाधाराचधर्म्मज्ञाधर्म्मस ङ्गेपदेशिनी ॥ भगेश्वरीभगाराध्याभगिनीभगनायिका ॥ भग बिम्बाभगक्लिन्नाभगयोनिर्भगप्रदा॥ भगेश्वरीभगाराध्याभगिनी भगनायका ॥ भगेशीभगरूपाचभगगुह्याभगावहा ॥ भगोदरीभ गानन्दाभगस्थाभगशालिनी ॥ सर्व्वसङ्क्षोभिणीशक्तिस्सर्व्ववि द्राविणीतथा ॥ मालिनीमाधवीमाध्वीमधुरूपामहोत्कटा ॥ भरु ण्डचन्द्रिकाज्योत्स्नाविश्वचक्षुस्तमोपहा ॥ सुप्रसन्नामहादूती यमदूतीभयङ्करी ॥ उन्मादिनीमहारूपादिव्यरूपासुरार्च्चिता ॥चै तन्यरूपिणीनित्याक्लिन्नाकाममदोद्धता ॥ मदिरानन्दकैवल्याम दिराक्षीमदालसा ॥ सिद्धेश्वरीसिद्धविद्यासिद्धाद्यासिद्धसम्भवा ॥ सिद्धर्द्धिःसिद्धमाताचसिद्धिस्सव्वार्थसिद्धिदा ॥ मनोमयीगुणा तीतापरञ्ज्योतिःस्वरूपिणी ॥ परेशीपरगापारापरासिद्धिःप रागतिः ॥ विमलामोहिनीआद्यामधुपानपरायणा ॥ वेदवेदाङ्ग जननीसर्व्वशास्त्रविशारदा ॥ सर्व्वदेवमयीविद्यासर्व्वशास्त्रमयी तथा ॥ सर्व्वज्ञानमयीदेवीसर्व्वधर्म्ममयीश्वरी ॥ सर्व्वयज्ञमयी यज्ञासर्व्वमन्त्राधिकारिणी॥ सर्व्वसम्पत्प्रतिष्ठात्रीसर्व्वविद्राविणी परा ॥ सर्व्वसङ्क्षोभिणीदेवीसर्व्वमङ्गलकारिणी ॥त्रैलोक्याकर्षिणी देवी सर्व्वाह्लादनकारिणी ॥ सर्व्वसम्मोहिनीदेवीसर्व्वस्तम्भन कारिणी॥ त्रैलोक्यजृम्भिणीदेवीतथासर्व्ववशङ्करी॥त्रैलोक्यरञ्जि नीदेवी सर्व्वसम्पत्तिदायिनी॥सर्व्वमन्त्रमयीदेवीसर्व्वद्वन्द्वक्षयङ्क री॥सर्व्वसिद्धिप्रदादेवीसर्व्वसम्पत्प्रदायिनी॥सर्व्वप्रियकरीदेवीस र्व्वमङ्गलकारिणी॥सर्व्वकामप्रदादेवीसर्व्वदुःखविमोचिनी॥ सर्व्व

मृत्युप्रशमनीसर्व्वविघ्नविनाशिनी ॥ सर्व्वाङ्गसुन्दरीमातासर्व्वसौ भाग्यदायिनी ॥ सर्व्वज्ञासर्व्वशक्तिश्चसर्व्वैश्वर्य्यफलप्रदा ॥ सर्व्वज्ञा नमयीदेवीसर्व्वव्याधिविनाशिनी ॥ सर्व्वाधारस्वरूपाचसर्व्वपाप हरातथा ॥ सर्व्वानन्दमयीदेवीसर्व्वेक्षायाःस्वरूपिणी ॥ सर्व्वलक्ष्मी मयीविद्यासर्व्वेप्सितफलप्रदा ॥ सर्व्वारिष्टप्रशमनीपरमानन्ददा यिनी ॥ त्रिकोणनिलयात्रिस्थात्रिमात्रात्रितनुस्थिता ॥ त्रिवे णी त्रिपथात्रिस्थात्रिमूर्त्तिस्त्रिपुरेश्वरी ॥ त्रिधाग्नीत्रिदशाध्यक्षात्रि विक्त्रिपुरवासिनी ॥ त्रयीविद्याचत्रिशिरात्रैलोक्याचत्रिपुष्करा ॥ त्रिकोटरस्थात्रिविधात्रिपुरात्रिपुरात्मिका ॥ त्रिपुराश्रीत्रिजननी त्रिपुरात्रिपुरसुन्दरी ॥ इदन्त्रिपुरसुन्दर्य्यास्तोत्रन्नामसहस्रकम् ॥ गुह्याद्गुह्यतरम्पुत्रतवप्रीत्यैप्रकीर्त्तितम् ॥ गोपनीयम्प्रयत्नेन पठनीयम्प्रयत्नतः ॥ नातःपरतरम्पुण्यन्नातःपरतरन्तपः ॥ नातःपरतरंस्तोत्रन्नातःपरतरागतिः ॥ स्तोत्रं सहस्रनामा ख्यंममवक्त्राद्विनिर्ग्गतम् ॥ यःपठेत्प्रयतोभक्त्याशृणुयाद्वासमा हितः ॥ मोक्षार्त्थीलभतेमोक्षंस्वर्ग्गार्त्थीस्वर्ग्गमाप्नुयात् ॥ कामां श्चप्राप्नुयात्कामीधनार्त्थीचलभेद्धनम् ॥ विद्यार्त्थीलभतेविद्याँय्य शोर्त्थीलभतेयशः ॥ कन्यार्त्थीलभतेकन्यांसुतार्त्थीलभतेसुतम् ॥ गुर्व्विणीजनयेत्पुत्रङ्कन्याविन्दतिसत्पतिम् ॥ मूक्खोंपिलभतेशा स्त्रंहीनोऽपिलभतेगतिम् ॥ सङ्क्रान्त्याञ्चार्क्कामावस्यामष्टम्याञ्च विशेषतः ॥ पौर्ण्णमास्याञ्चतुर्द्दश्यान्नवम्याम्भौमवासरे ॥ पठेद्वापाठ येद्वापिशृणुयाद्वासमाहितः ॥ समुक्तस्सर्व्वपापेभ्यःकामेश्वरसमो भवेत् ॥ लक्ष्मीवान्धनवञ्चैववल्लभस्सर्व्वयोषिताम् ॥ तस्यव श्यम्भवेदाशुत्रैलोक्यंसचराचरम् ॥ रुद्रन्दृष्ट्वायथादेवाविष्णु न्दृष्ट्वाचदानवाः ॥ यथाहिर्ग्गरुडन्दृष्ट्वासिंहन्दृष्ट्वायथागजाः ॥ की टवत्प्रपलायन्तेतस्यवक्त्रावलोकनात् ॥ अग्निचौरभयन्तस्यकदा

चित्रैवसम्भवेत् ॥ पातकाविविधाःशान्तिम्मेरुपर्व्वतसन्निभाः॥य स्मात्तच्छृणुयाद्विघ्नांस्तृणव्वह्निहुतय्यथा ॥ एकदापठनादेवसर्व्व पापक्षयोभवेत्॥ दशधापठनादेववाचासिद्धिःप्रजायते॥ शत धा पठनाद्वापिखेचरोजायतेनरः ॥ सहस्रदशसङ्ख्यातय्यःपठेद्भक्ति मानसः ॥ मातास्यजगतान्धात्री प्रत्यक्षाभवतिध्रुवम् ॥ लक्षपू र्णेयथापुत्रस्तोत्रराजम्पठेत्सुधीः ॥ भवपाशविनिर्म्मुक्तोममतु ल्योनसंशयः ॥ सर्व्वतीर्त्थेषुयत्पुण्यंसकृज्जप्त्वालभेन्नरः ॥सर्व्ववे देषुयत्प्रोक्तन्तत्फलम्परिकीर्त्तितम् ॥ भूत्वाचबलवान्पुत्रधनवा न्सर्व्वसम्पदः॥देहान्तेपरमंस्थानय्यत्सुरैरपिदुर्ल्लभम्॥सयास्यति नसन्देहःस्तवराजस्यकीर्त्तनात् ॥इतिश्रीवामकेश्वरतन्त्रेहरकुमा रसव्वादेमहात्रिपुरसुन्दर्य्याःषोडश्याःसहस्रनामस्तोत्रंसमाप्तम् ॥

इति शाक्तप्रमोदे त्रिपुरसुन्दरीषोडशी तन्त्रं समाप्तम् ।



" श्रीवेङ्कटेश्वर " (स्टीम्) यन्त्रालय–बंबई.